*उदा०-चवर्ग (च्) गोत्रे कुञ्जादिभ्यश्च्फञ्-कौञ्जायन्यः। कुञ्ज के पौत्र। (छ्) छ् को ईय् आदेश हो जाता है। (ज्) जस्-ब्राह्मणाः। सब ब्राह्मण। (झ्) को अन्त आदेश हो जाता है। (ञ्) **शण्डिकादिभ्यो ञ्यः**-शाण्डिक्यः। शण्डिक का अभिजन। पूर्वजों का देश। टवर्ग (ट्) **चरेष्टः-कुरुचरी। कुरु देश में** घूमनेवाली नारी। कुरु=दिल्ली के आस-पास का प्रदेश। मद्रचरी। **मद्रदेश में घूमनेवाली नारी**। (ठ्) ठ् के स्थान में इक् आदेश होता है। (ड्) **सप्तम्यां** जनेर्डः-उपसरजः। **प्रथम बार** गर्भ धारण करने पर उत्पन्न हुआ गाय का बछड़ा। **मन्दुरजः**। घुड़साल में पैदा **होनेवाला**। (ढ्) ढ् को एय् आदेश हो जाता है। (ण्) **अन्नाण्णः-आन्नः**। अन्न को प्राप्त **करनेवाला**।*

*सिद्धि-(१) **कौञ्जायन्यः**। कुञ्ज+च्फञ्। कुञ्ज+फ। कुञ्ज+**आयन**। **कौञ्जायन+ञ्य**। **कौञ्जायन्+य**। कौञ्जायन्य+सु। **कौञ्जायन्यः**।*

*यहां **'गोत्रे कुञ्जादिभ्यश्च्फञ्'** (४।१।९८) से कुञ्ज शब्द से **च्फञ्** प्रत्यय करने पर इस सूत्र से **प्रत्यय के 'च्' की इत् संज्ञा होती है। च्फञ् प्रत्यय के पश्चात् 'व्रातच्फञोरस्त्रियाम्' (५।३।११३) से स्वार्थ में ञ्य प्रत्यय होता है।***

(२) ब्राह्मणाः । ब्राह्मण+जस् । ब्राह्मण+अस् । ब्राह्मणाः ।

यहां ब्राह्मण शब्द से 'स्वौजस०' (४।१।२) जस् प्रत्यय करने पर इस सूत्र से प्रत्यय के 'ज्' की इत् संज्ञा होती है।

(३) शाण्डिक्यः । शण्डिक+ञ्य । शण्डिक+य । शाण्डिक्+य । शाण्डिक्य+सु । शाण्डिक्यः ।

यहां शण्डिक शब्द से 'शण्डिकादिभ्यो ञ्यः' (४।३।९२) से 'ञ्य' प्रत्यय करने पर इस सूत्र से प्रत्यय के 'ञ्' की इत् संज्ञा होती है।

(४) कुरुचरी । कुरु+चर्+ट । कुरु+चर्+अ । कुरुचर+ङीप् । कुरुचर+ई । कुरुचरी+सु । कुरुचरी ।

यहां कुरु उपपदवाली 'चर् गतौ' (भ्वा०प०) धातु से 'चरेष्टः' (३।२।१६) से ट प्रत्यय करने पर इस सूत्र के प्रत्यय के 'ट्' की इत् संज्ञा होती है। स्त्रीत्व की विवक्षा में 'टिड्ढाणञ्०' (४।१।१५) से ङीप् प्रत्यय होता है।

(५) उपसरजः । उपसर+जन्+ड । उपसर+जन्+अ । उपसर+ज्+अ । उपसरज+सु । उपसरजः ।

यहां उपसर उपपदवाली 'जनी प्रादुर्भावे' (दि०आ०) धातु से 'सप्तम्यां जनेर्डः' (३।२।९७) से ड प्रत्यय होता है। इस सूत्र से प्रत्यय के 'ड्' की इत् संज्ञा होती है। प्रत्यय के डित् होने से 'डित्त्वादभस्यापि टेर्लोपः' से जन् के टि भाग का लोप हो जाता है।

(६) आन्नः । अन्न+ण । आन्न्+अ । आन्न+सु । आन्नः । यहां 'अन्न' शब्द से 'लब्धा' अर्थ में 'अन्नाण्णः' (४।४।८५) से ण प्रत्यय है। इस सूत्र से ण प्रत्यय के ण् की इत् संज्ञा होती। 'तद्धितेष्वचामादेः' (७।२।११७) से आदिवृद्धि होती है।

अतद्धिता लकारशकारकवर्गाः–

लशक्वतद्धिते ।६।

प०वि०–ल-श्-कु १।१ अतद्धिते ७।१।

स०–लश्च श् च कुश्च एतेषां समाहारः–लशकु (समाहारद्वन्द्वः)। न तद्धित इति अतद्धितः, तस्मिन्–अतद्धिते (नञ्तत्पुरुषः)।

अनु०–'उपदेशे प्रत्ययस्य, आदिः, इत्' इत्यनुवर्तते।

अन्वयः–उपदेशेऽतद्धिते लशकु इत्।

अर्थः–पाणिनीय-उपदेशे तद्धितवर्जितानां प्रत्ययस्यादौ वर्तमानानां लकार-शकार-कवर्गाणाम् इत् संज्ञा भवति।

उदा०–(ल्) **ल्युट् च**–चयनम्। जनयम्। (श्) **कर्तरि शप्**–भवति। पचति। कवर्गः–(क्) **क्तक्तवतू निष्ठा**–भुक्तः। भुक्तवान्। (ख्) **प्रियवशे**

वदः खच्-प्रियंवदः । वशंवदः । (ग) **ग्लाजिस्थश्च ग्स्नुः**-ग्लास्नुः । जिष्णुः । स्थास्नुः । भूष्णुः । (घ) **भञ्जभासमिदो घुरच्**-भङ्गुरम् । (ङ) **टाङसिङसामिनात्स्याः**-वृक्षात् । वृक्षस्य ।

आर्यभाषा-अर्थ-(अतद्धिते) तद्धित प्रकरण को छोड़कर (प्रत्ययस्य) प्रत्यय के (आदिः) आदि में वर्तमान (ल्-श्-कु) लकार, शकार और कवर्ग की (इत्) इत् संज्ञा होती है।

*उदा०-(ल्) ल्युट् च-चयनम् । चुनना । जयनम् । जीतना । (श्) **कर्तरि शप्**-भवति । होता है । पचति । पकाता है । कवर्ग (क्) **क्तक्तवतू निष्ठा**-भुक्तः । भुक्तवान् । खाया । (ख्) **प्रियवशे** वदः खच्-प्रियंवदः । प्रिय बोलनेवाला । वशंवदः । वश में रहनेवाला, आज्ञाकारी । (ग्) ग्लाजिस्थश्च ग्स्नुः । ग्लास्नुः । ग्लानि करनेवाला । जिष्णुः । जीतनेवाला । स्थास्नुः । स्थिर । भूष्णुः । सत्तावाला । (घ्) **भञ्जभासमिदो घुरच्**-भङ्गुरम् । नष्ट होनेवाला । (ङ्) टाङसिङसामिनात्स्याः-वृक्षात् । वृक्ष से । वृक्षस्य । वृक्ष का ।*

*सिद्धि-(१) **चयनम्** । चि+ल्युट् । चि+यु । चि+अन । चे+अन । चयन+सु । चयनम् ।*

यहां 'चिञ् चयने' (स्वा०उ०) धातु से 'ल्युट् च' (३ ।३ ।११५) लुट् प्रत्यय करने पर इस सूत्र से प्रत्यय के 'ल्' की इत्संज्ञा होती है। ऐसे ही-'जि जये' (भ्वा०प०) से जि+ल्युट् । जयनम् ।

*(२) **भवति** । भू+लट् । भू+शप्+तिप् । भू+अ+ति । भो+अ+ति । भवति ।*

यहां 'भू सत्तायाम्' (भ्वा०प०) धातु से 'वर्तमाने लट्' (३ ।२ ।१२३) से प्रत्यय तथा 'तिपतस्झि०' (३ ।४ ।७८) से ल् के स्थान में तिप् आदेश करने पर 'कर्तरि शप्' (३ ।१ ।६८) से शप् प्रत्यय होता है। इस सूत्र से शप् प्रत्यय के 'श्' की इत् संज्ञा होती है। इसी प्रकार से 'डुपचष् पाके' (भ्वा०उ०) धातु से-पचति ।

*(३) **भुक्तः** । भुज्+क्त । भुज्+त । भुक्+त । भुक्त+सु । भुक्तः ।*

यहां 'भुज पालनाभ्यवहारयोः' (रुधा०आ०) से क्त प्रत्यय करने पर इस सूत्र से प्रत्यय के 'क्' की इत् संज्ञा होती है। भुत्+क्तवतु । भुक्तवान् ।

*(४) **प्रियंवदः** । प्रिय+वद्+खच् । प्रिय+वद्+अ । प्रियमुम् अ+वद्+अ । प्रियंवद+अ । प्रियंवद+सु । प्रियंवदः ।*

यहां प्रिय शब्द उपपदवाली 'वद व्यक्तायां वाचि' (भ्वा०प०) धातु से 'प्रियवशे वदः खच्' (३ ।२ ।३८) से 'खच्' प्रत्यय होता है। इस सूत्र से प्रत्यय के 'ख्' की इत् संज्ञा होती है। तत्पश्चात् 'अरुर्द्विषदन्तजन्तस्य मुम्' (६ ।३ ।६७) से उपपद को 'मुम्' का आगम होता है।

*(५) **ग्लास्नुः** । ग्ला+ग्स्नु । ग्ला+स्नु । ग्लास्नु+सु । ग्लास्नुः ।*

यहां 'ग्लै हर्षक्षये' (भ्वा०प०) धातु से 'ग्लाजिस्थश्च ग्स्नुः' (३ ।२ ।१३९) से 'ग्स्नु' प्रत्यय करने पर इस सूत्र से प्रत्यय के 'ग्' की इत् संज्ञा होती है।

(६) भङ्गुरम्। भञ्ज्+घुरच्। भञ्ज्+उर। भङ्ग्+उर। भङ्गुर+सु। भङ्गुरम्।

यहां 'भञ्जो आमर्दने' (रुधा०प०) धातु से 'भञ्जभासमिदो घुरच्' (३।२।१६१) से 'घुरच्' प्रत्यय करने पर इस सूत्र से प्रत्यय के 'घ' की इत् संज्ञा होती है। तत्पश्चात् प्रत्यय के घित् होने से 'चजोः कु घिण्ण्यतोः' (७।२।५२) से धातु के 'ज्' को कुत्व गकार हो जाता है।

(७) वृक्षात्। वृक्ष+ङसि। वृक्ष+अस्। वृक्ष+आत्। वृक्षात्।

यहां वृक्ष शब्द से ङसि प्रत्यय करने पर इस सूत्र से प्रत्यय के 'ङ्' की इत् संज्ञा होती है। तत्पश्चात् 'टाङसिङसामिनात्स्याः' (७।१।१२) से 'ङसि' प्रत्यय के स्थान में 'आत्' आदेश होता है। इसी प्रकार से वृक्ष+ङस्। वृक्ष+अस्। वृक्ष+स्य। वृक्षस्य।

इत्संज्ञकस्य लोपः-

तस्य लोपः।६।

प०वि०-तस्य ६।१ लोपः १।१।

अर्थः-तस्य इत्संज्ञकस्य वर्णस्य लोपो भवति।

उदा०-अइउण्, ऋॡक्। अत्र णकारस्य ककारस्येत्संज्ञायां लोपो विधीयते।

आर्यभाषा-अर्थ-(तस्य) उस इत् संज्ञावाले अक्षर का (लोपः) लोप होता है।

उदा०-अ इ उ ण्। ऋॡक्। इत्यादि। यहां 'ण्' आदि की इत् संज्ञा होने से उनका लोप हो जाता है। लोप हो जाने से 'अक्' आदि प्रत्याहारों में 'ण्' आदि इत् संज्ञक वर्णों का ग्रहण नहीं किया जाता है।

यथासंख्यविधिः-

यथासङ्ख्यमनुदेशः समानाम्।१०।

प०वि०-यथासङ्ख्यम् १।१ अनुदेशः १।१ समानाम् ६।३। सङ्ख्यामनतिक्रम्य इति यथासङ्ख्यम् (अव्ययीभावः)।

अन्वयः-समानां यथासङ्ख्यमनुदेशः।

अर्थः-अस्मिन् शास्त्रे समानाम्=समसङ्ख्यानां शब्दानां यथासङ्ख्यम् अनुदेशः=उच्चारणं भवति।

उदा०-तूदीशलातुरवर्मतीकूचवाराड् ढक्छण्ढञ्यकः (४।३।९४) इति।

आर्यभाषा-अर्थ-इस शब्दशास्त्र में (समानाम्) समान संख्यावाले शब्दों का (यथासंख्यम्) संख्या के अनुसार ही (अनुदेशः) उच्चारण किया जाता है। जैसे

'तूदीशलातुरवर्मतीकूचवाराड् ढक्छण्ढञ्यकः' (४।३।९४) अर्थात् तूदी, शलातुर, वर्मती, कूचवार शब्दों से ढक्, छण्, ढञ् और यक् प्रत्यय होते हैं। इस सूत्र से प्रथम शब्द से प्रथम प्रत्यय, द्वितीय शब्द से द्वितीय प्रत्यय, तृतीय शब्द से तृतीय प्रत्यय और चतुर्थ शब्द से चतुर्थ प्रत्यय संख्या के अनुसार किया जाता है, अन्यथा किसी शब्द से कोई भी प्रत्यय होना सम्भव है।

अधिकारलक्षणम्–

स्वरितेनाधिकारः ।१०।

प०वि०–स्वरितेन ३।१ अधिकारः १।१।

अर्थः–अस्मिन् शास्त्रे स्वरितेन चिह्नेनाधिकारो वेदितव्यः।

उदा०–प्रत्ययः (३।१।१) **ङ्याप्प्रातिपदिकात्** (४।१।१) **अङ्गस्य** (६।४।१) **भस्य** (६।४।१२९) **पदस्य** (८।४।१२९) इत्यादि।

आर्यभाषा-अर्थ–*इस शब्दशास्त्र में स्वरित नामक स्वर चिह्न से (अधिकारः) उस शब्द का अधिकार समझना चाहिये। जैसे-**प्रत्ययः** (३।१।१)। **धातोः** (अ० ३।१।९१)। **ङ्याप्प्रातिपदिकात्** (अ० ४।१।१)। **अङ्गस्य** (अ० ६।४।१)। **भस्य** (अ० ६।४।१२९) **पदस्य** (अ० ८।४।१२९) इत्यादि।*

विशेष–आजकल अष्टाध्यायी में अधिकारवाले शब्दों पर स्वरित स्वर का चिह्न दिखाई नहीं देता है। 'प्रतिज्ञास्वरिताः पाणिनीयाः' इस गुरुवचन से पाणिनिमुनि के शिष्य प्रतिज्ञामात्र से ही अधिकारवाले शब्दों को स्वरित मानते हैं कि यह शब्द स्वरित है, अतः अब इसका यहां अधिकार है। इस शब्द की आगामी सूत्रों में अनुवृत्ति ली जाती है।

आत्मनेपदप्रकरणम्

अनुदात्तेद् ङिच्च धातुः–

(१) अनुदात्तङित आत्मनेपदम् ।१२।

प०वि०–अनुदात्त-ङितः ५।१ आत्मनेपदम् १।१।

स०–अनुदात्तश्च ङश्च तौ–अनुदात्तङौ, इच्च इच्च तौ–इतौ। अनुदात्तङौ इतौ यस्य सः–अनुदात्तङित्, तस्मात्–अनुदात्तङितः (इतरेतरयोगद्वन्द्वगर्भितबहुव्रीहिः)।

अर्थः–अनुदात्तेतो ङितश्च धातोरात्मनेपदं भवति।

उदा०–(अनुदात्तेत्) **आस् उपवेशने**–आस्ते। **वस् आच्छादने–वस्ते।**
(ङित्) षूङ् प्राणिगर्भविमोचने–सूते। शीङ् स्वप्ने–शेते।

आर्यभाषा-अर्थ-(अनुदात्त-ङित:) अनुदात्तेत् और ङित् धातु से (आत्मनेपदम्) आत्मनेपद संज्ञक प्रत्यय होता है।

उदा०-(अनुदात्तेत्) आस् उपवेशने-आस्ते। बैठता है। वस् आच्छाने-वस्ते। ढकता है। (ङित्) षूङ् प्राणिगर्भविमोचने-सूते। जन्म लेता है। शीङ् स्वप्ने-शेते। सोता है।

सिद्धि-(१) आस्ते। आस्+लट्। आस्+ल्। आस्+त्। आस्+शप्+त। आस्+०+त। आस्ते।

यहां 'आस् उपदेशने' (अदा०आ०) धातु से 'वर्तमाने लट्' (३।२।१२३) से 'लट्' प्रत्यय है। पाणिनिमुनि ने अपने धातुपाठ में 'आस्' धातु को 'अनुदात्तेत्' पढ़ा है। अतः इससे 'त' आदि आत्मनेपद संज्ञक प्रत्यय होते हैं। इसी प्रकार से-वस्ते।

(२) सूते। षूङ्+लट्। सू+ल्। सू+त। सू+शप्+त। सू+०+त। सूते।

यहां षूङ् धातु के ङ् की 'हलन्त्यम्' (१।३।३) से इत् संज्ञा होती है। यह ङित् धातु है। ङित् धातु से इस सूत्र से 'त' आदि आत्मनेपद संज्ञक प्रत्यय होते हैं। इसी प्रकार से-शेते।

विशेष-आत्मनेपद संज्ञक प्रत्यय ये हैं-त। आताम्। झ। थास्। आथाम्। ध्वम्। इट्। वहि। महिङ्। शानच्। कानच्। चानश्। 'तङानावात्मनेपदम्' (१।४।१४०) से इन प्रत्ययों की आत्मनेपद संज्ञा की गई है।

भाववाच्ये कर्मवाच्ये च-

(२) भावकर्मणोः।१३।

प०वि०-भाव-कर्मणोः ७।२।

स०-भावश्च कर्म च ते भावकर्मणी, तयोः-भावकर्मणोः (इतरेतरयोगद्वन्द्वः)।

अनु०-'आत्मनेपदम्' इति सर्वत्रानुवर्तते।

अन्वयः-भावकर्मणोरात्मनेपदम्।

अर्थः-भाववाच्ये कर्मवाच्ये चार्थे धातोरात्मनेपदं भवति।

उदा०-(**भाववाच्ये**) ग्लायते भवता। सुप्यते भवता। आस्यते भवता। (**कर्मवाच्ये**) क्रियते कटो देवदत्तेन। ह्रियते भारो देवदत्तेन। (**कर्मकर्तृवाच्ये**) लूयते केदारः स्वयमेव।

आर्यभाषा-अर्थ-(भाव-कर्मणोः) भाववाच्य और कर्मवाच्य अर्थ में धातु से (आत्मनेपदम्) आत्मपद होता है।

उदा०-(भाववाच्य) ग्लायते भवता। सुप्यते भवता। आस्यते भवता। (कर्मवाच्य) क्रियते कटो देवदत्तेन। देवदत्त के द्वारा चटाई बनाई जाती है। ह्रियते भारो देवदत्तेन। देवदत्त के द्वारा भार हरण किया जाता है। (कर्मकर्तृवाच्य) लूयते केदारः स्वयमेव। खेत स्वयं ही कट रहा है।

सिद्धि-(१) क्रियते। कृ+लट्। कृ+त। कृ+यक्+त। क् रिङ्+य+त। क्रि+य+ते। क्रियते।

यहां 'डुकृञ् करणे' (त०उ०) धातु से कर्मवाच्य में लट् प्रत्यय, उसके स्थान में 'तिप्तस्झि०' (३।४।७८) से आत्मनेपद का 'त' आदेश होता है। 'सार्वधातुके यक्' (३।१।६७) से भाव और कर्मवाच्य में धातु से 'यक्' प्रत्यय और 'रिङ्शयग्लिङ्क्षु' (७।४।२८) से धातु के 'ऋ' को 'रिङ्' आदेश होता है। इसी प्रकार 'हृञ् हरणे' (भ्वा०उ०) धातु से ह्रियते और 'लूञ् लवने' (क्र्या०उ०) धातु से लूयते शब्द सिद्ध होता है।

विशेष-(१) सकर्मक और अकर्मक भेद से धातु दो प्रकार की होती है। जिनका कोई कर्म मिलता है, उन्हें सकर्मक और जिनका कोई कर्म नहीं मिलता है, उन्हें अकर्मक धातु कहते हैं। 'लः कर्मणि च भावे चाकर्मकेभ्यः' (३।४।६९) अर्थात् सकर्मक धातुओं से कर्मवाच्य और कर्तृवाच्य अर्थ में लकार होते हैं। अकर्मक धातुओं से भाववाच्य और कर्तृवाच्य में लकार होते हैं। 'ग्लै हर्षक्षये' (भ्वा०प०) यह अकर्मक धातु है। इससे भाववाच्य में लकार होता है। ग्लायते भवता। आपके द्वारा ग्लानि की जाती है। इसी प्रकार से 'आस् उपवेशने' (अ०आ०) आस्यते भवता। आपके द्वारा बैठा जाता है। 'ञिष्वप् शये' (अ०आ०) सुप्यते भवता। आपके द्वारा सोया जाता है।

'डुकृञ् करणे' (त०उ०) धातु सकर्मक है। इसलिये इससे कर्मवाच्य अर्थ में लकार होता है-क्रियते कटो देवदत्तेन। देवदत्त के द्वारा चटाई बनाई जाती है। इसी प्रकार 'हृञ् हरणे' धातु से ह्रियते भारो देवदत्तेन। देवदत्त के द्वारा भार ढोया जाता है।

क्रियापदं कर्तृपदेन युक्तं
व्यपेक्षते यत्र किमित्यपेक्षाम्।
सकर्मकं तं सुधियो वदन्ति
शेषस्ततो धातुरकर्मकः स्यात्।।

अर्थ-जहां क्रियापद कर्तृपद से युक्त होकर 'किम्' शब्द की अपेक्षा करता है उस धातु को विद्वान् लोग सकर्मक कहते हैं और जहां क्रियापद, कर्तृपद से युक्त होकर 'किम्' शब्द की अपेक्षा नहीं करता, उसे अकर्मक धातु कहते हैं।

लज्जासत्तास्थितिजागरणं
वृद्धिक्षयभयजीवनमरणम्।
शयनक्रीडारुचिदीप्त्यर्थं
धातुगणं तमकर्मकमाहुः।।

अर्थ-लज्जा, सत्ता, स्थिति, जागरण, वृद्धि, क्षय, भय, जीवन, मरण, शयन, क्रीडा रुचि और दीप्ति अर्थवाली धातु अकर्मक होती हैं।

(२) जहां कर्म, कर्ता बनकर प्रयुक्त होता है, उसे 'कर्मकर्तृवाच्य' कहते हैं। जैसे ***'लूयते केदारः स्वयमेव।*** *खेत अपने आप कट रहा है। यहां 'केदार' शब्द 'कर्मकर्ता' है। जहां कर्म, कर्ता बन जाता है, वहां भी धातु से आत्मनेपद ही होता है। जहां केवल शुद्ध कर्ता होता है, वहां धातु से परस्मैपद का विधान किया गया है। इस विषय को निम्नलिखित रेखाचित्र से समझ लेवें।*

कर्मव्यतिहारे कर्तृवाच्ये-

(३) कर्तरि कर्मव्यतिहारे।१४।

प०वि०-कर्तरि ७।१ कर्म-व्यतिहारे ७।१।

स०-कर्मणो व्यतिहार इति कर्मव्यतिहारः, तस्मिन्-कर्मव्यतिहारे (षष्ठीतत्पुरुषः)। व्यतिहारः=विनिमयः।

अन्वयः-कर्मव्यतिहारे कर्तरि धातोरात्मनेपदम्।

अर्थः-कर्मव्यतिहारे=क्रियाया विनिमयेऽर्थे कर्तृवाच्ये धातोरात्मनेपदं भवति। कर्मशब्दोऽत्र क्रियावाची। कर्मव्यतिहारः=परस्परक्रियाकरणम्।

उदा०-व्यतिलुनते। व्यतिपुनते।

आर्यभाषा-अर्थ-(कर्मव्यतिहारे) क्रिया-विनिमय अर्थ में विद्यमान धातु से (कर्तरि) कर्तृवाच्य में (आत्मनेपदम्) आत्मनेपद होता है। यहां 'कर्मव्यतिहार' शब्द में 'कर्म' शब्द क्रियावाची है। 'व्यतिहार' का अर्थ विनिमय है। जहां अन्य सम्बन्धिनी क्रिया को कोई अन्य करता है और इतर सम्बन्धी क्रिया को इतर करता है उसे कर्मव्यतिहार कहते हैं।

उदा०-व्यतिलुनते। परस्पर काटते हैं। व्यतिपुनते। परस्पर पवित्र करते हैं।

सिद्धि-(१) व्यतिलुनते। व्यति+लू+लट्। व्यति+लू+झ। व्यति+लू+अत। व्यति+लू+श्ना+अत। व्यति+लू+ना+अत। व्यति+लू+न्+अते। व्यतिलुनते।

यहां 'लूञ् लवने' (क्र्या०उ०) धातु से 'वर्तमाने लट्' (३।२।१२३) से लट् प्रत्यय, 'तिप्तस्झि०' (३।४।७८) से 'ल्' के स्थान में आत्मनेपद 'झ' आदेश होता है और 'झ' के स्थान में 'आत्मनेपदेष्वनतः' (७।१।५) से 'अत्' 'क्र्यादिभ्यः श्ना' (३।१।८१) से श्ना प्रत्यय और 'श्नाभ्यस्तयोरातः' (६।४।११२) से 'श्ना' प्रत्यय के आ का लोप और 'प्वादीनां ह्रस्वः' (७।३।८०) से धातु को ह्रस्व होता है। 'पूञ् पवने' (क्र्या०उ०)-व्यतिपुनते।

(२) 'लुञ्' धातु के ञित् होने से 'स्वरितञितः कर्त्रभिप्राये क्रियाफले' (१।३।७२) से आत्मनेपद और परस्मैपद भी हो सकता है, किन्तु कर्मव्यतिहार अर्थ में इस सूत्र से आत्मनेपद ही होता है।

आत्मनेपदप्रतिषेधः-

(४) न गतिहिंसार्थेभ्यः।१५।

प०वि०-न अव्ययपदम्, गति-हिंसार्थेभ्यः ५।३।

स०-गतिश्च हिंसा च ते-गतिहिंसे, अर्थश्च अर्थश्च तौ-अर्थौ। गतिहिंसे अर्थौ येषां ते गतिहिंसार्थाः, तेभ्यः-गतिहिंसार्थेभ्यः (इतरेतरयोग-द्वन्द्वगर्भितबहुव्रीहिः)।

अनु०-'कर्तरि कर्मव्यतिहारे' इत्यनुवर्तते।

अन्वयः-कर्मव्यतिहारे गतिहिंसार्थेभ्यः कर्तरि आत्मनेपदं न।

अर्थः-कर्मव्यतिहारे=क्रियाविनिमयेऽर्थे गत्यर्थेभ्यो हिंसार्थेभ्यश्च धातुभ्यः कर्तृवाच्ये आत्मनेपदं न भवति।

उदा०-(गत्यर्थेभ्यः) व्यतिगच्छन्ति। व्यतिसर्पन्ति। **(हिंसार्थेभ्यः)** व्यतिहिंसन्ति। व्यतिघ्नन्ति।

आर्यभाषा-अर्थ-(कर्मव्यतिहारे) क्रिया-विनिमय अर्थ में विद्यमान (गतिहिंसार्थेभ्यः) गति और हिंसा अर्थवाली धातुओं से (कर्तरि) कर्तृवाच्य में (आत्मनेपदम्) आत्मनेपद (न) नहीं होता है।

उदा०-(गत्यर्थक) व्यतिगच्छन्ति। परस्पर जाते हैं। व्यतिसर्पन्ति। परस्पर सरकते हैं। (हिंसार्थक) व्यतिहिंसन्ति। परस्पर हिंसा करते हैं। व्यतिघ्नन्ति। परस्पर हिंसा/गति करते हैं।

सिद्धि-(१) व्यतिगच्छन्ति। व्यति+गम्+लट्। व्यति+गम्+ल्। व्यति+गम्+झि। व्यति+गम्+अन्ति। व्यति+गम्+शप्+अन्ति। व्यति+गम्+अ+अन्ति। व्यति+गच्छ्+अ+अन्ति। व्यतिगच्छन्ति।

*यहां 'गम्लृ गतौ' (भ्वा०प०) धातु से 'वर्तमाने लट्' (३।२।१२३) से लट् प्रत्यय **और** 'ल्' के स्थान में 'तिप्तस्झि०' (३।४।७८) से परस्मैपद 'झि' आदेश होता है। **'इषुगमियमां छः'** (७।३।७७) से धातु के 'म्' को 'छ्' आदेश हो जाता है।*

*(२) **व्यतिसर्पन्ति। सृप्लृ गतौ** (भ्वा०प०)।*

*(३) **व्यतिहिंसन्ति। हिंसि हिंसायाम्** (रु०प०)।*

*(४) **व्यतिघ्नन्ति। हन् हिंसागत्योः** (अ०प०)।*

(५) इतरेतरान्योऽन्योपपदाच्च।१६।

प०वि०-इतरेतर-अन्योऽन्योपपदात् ५।१, च अव्ययपदम्।

स०-इतरेतरश्च अन्योऽन्यश्च तौ-इतरेतरान्योऽन्यौ। इतरेतरान्योऽन्यौ, उपपदे यस्य सः-इतरेतरान्योऽन्योपपदः, तस्मात्-इतरेतरान्योऽन्योपपदात् (इतरेतरयोगद्वन्द्वगर्भितबहुव्रीहिः)।

अनु०-'कर्तरि कर्मव्यतिहारे न' इत्यनुवर्तते।

अन्वयः-कर्मव्यतिहारे इतरेतरान्योऽन्योपपदात् धातोः कर्तरि आत्मनेपदं न।

अर्थः-कर्मव्यतिहारेऽर्थे इतरेतरोपपदाद् अन्योऽन्योपपदाच्च धातोः कर्तृवाच्ये आत्मनेपदं न भवति।

उदा०-(इतरेतरोपपदात्) इतरेतरस्य व्यतिलुनन्ति। **(अन्योऽन्योपपदात्)** अन्योऽन्यस्य व्यतिलुनन्ति।

आर्यभाषा-अर्थ-(कर्मव्यतिहारे) क्रिया-विनिमय अर्थ में विद्यमान (इतरेतर-अन्योऽन्योपपदात्) इतरेतर और अन्योऽन्य शब्द उपपदवाली धातु से (कर्तरि) कर्तृवाच्य में (आत्मनेपदम्) आत्मनेपद (न) नहीं होता है।

उदा०-(इतरेतर) इतरेतरस्य व्यतिलुनन्ति। (अन्योऽन्य) अन्योऽन्यस्य व्यतिलुनन्ति। एक-दूसरे का काटते हैं।

*(१) **व्यतिलुनन्ति।** व्यति+लू+लट्। व्यति+लू+ल्। व्यति+लू+झि। व्यति+लू+अन्ति। व्यति+लू+श्ना+अन्ति। व्यति+लू+ना+अन्ति। व्यति+लु+न्+अन्ति। व्यतिलुनन्ति।*

*यहां 'लूञ् छेदने' (क्र्या०उ०) धातु से 'वर्तमाने लट्' (३।२।१२३) से लट् प्रत्यय और 'तिप्तस्झि०' (३।४।७८) से परस्मैपद 'झि' आदेश होता है। **'क्र्यादिभ्यः श्ना'** (३।१।८१) से श्ना विकरण प्रत्यय, **'श्नाभ्यस्तयोरातः'** (६।४।११२) से श्ना के आ का लोप और **'प्वादीनां ह्रस्वः'** (७।३।८०) से लू धातु को ह्रस्व होता है।*

विश-प्रवेशने (तु०प०)–

(४) नेर्विशः ।७।

प०वि०–नेः ५ ।१ विशः ५ ।१ ।

अनु०–'कर्तरि आत्मनेपदम्' इति सर्वत्रानुवर्तते ।

अन्वयः–नेर्विशः कर्तरि आत्मनेपदम् ।

अर्थः–नि–उपसर्गपूर्वाद् विशो धातोः कर्तरि आत्मनेपदं भवति ।

उदा०–निविशते ।

__आर्यभाषा-अर्थ__–(नेः) उपसर्ग से परे (विशः) विश् धातु से (कर्तरि) कर्तृवाच्य में (आत्मनेपदम्) आत्मनेपद होता है। निविशते। घुसता है।

__सिद्धि__–(१) __निविशते।__ नि+विश्+लट्। नि+विश्+त। नि+विश्+श+त। नि+विश्+अ+ते। निविशते।

यहां 'नि' उपसर्ग से परे __'विश प्रवेशने'__ (तु०उ०) धातु से पूर्ववत् 'लट्' प्रत्यय और ल् के स्थान में आत्मनेपद 'त' आदेश होता है।

__विशेष__–(१) इस प्रकरण में प्रायः उपसर्ग से परे धातु से आत्मनेपद का विधान किया गया है। उपसर्ग ये हैं–प्र। परा। अप। सम्। अनु। अव। निस्। दुस्। वि। आङ्। नि। अधि। अपि। अति। सु। उत्। अभि। प्रति। परि। उप।

__अनुवृत्ति__– __'कर्तरि आत्मनेपदम्'__ की अनुवृत्ति __'शेषात् कर्तरि परस्मैपदम्'__ तक है। अतः प्रत्येक सूत्र में इसकी अनुवृत्ति नहीं दिखाई जायेगी।

डुक्रीञ् द्रव्यविनिमये (क्र्या०उ०)–

(७) परिव्यवेभ्यः क्रियः ।१८।

प०वि०–परि-वि-अवेभ्यः ५ ।३ क्रियः ५ ।१ ।

स०–परिश्च विश्व अवश्च ते-परिव्यवाः, तेभ्यः-परिव्यवेभ्यः (इतरेतरयोगद्वन्द्वः) ।

अन्वयः–परिव्यवेभ्यः क्रियः कर्तरि आत्मनेपदम् ।

अर्थः–परि–वि–अव–उपसर्गपूर्वात् क्री–धातोः कर्तरि आत्मनेपदं भवति ।

उदा०–**(परि)** परिक्रीणीते । **(वि)** विक्रीणीते । **(अव)** अवक्रीणीते ।

__आर्यभाषा-अर्थ__–(परि-वि-अवेभ्यः) परि, वि, अव उपसर्ग से परे (क्रियः) क्री धातु से (कर्तरि) कर्तृवाच्य में (आत्मनेपदम्) आत्मनेपद होता है।

उदा०–(परि) परिक्रीणीते। किसी को पैसे से खरीदता है। (वि) विक्रीणंते। बेचता है। (अव) अवक्रीणीते। किराये पर लेता है।

*सिद्धि-(१) **परिक्रीणीते।** परि+क्री+लट्। परि+क्री+त। परि+क्री+श्ना+त। परि+क्री+ना+त। परि+क्री+नी+ते। परिक्रीणीते।*

*यहां 'परि' उपसर्गपूर्वक **'डुकृञ् द्रव्यविनिमये'** (क्या०उ०) धातु से पूर्ववत् 'लट्' प्रत्यय और उसके स्थान में आत्मनेपद 'त' आदेश होता है। **'क्र्यादिभ्यः श्ना'** (३।१।८१) से श्ना प्रत्यय और 'ई हल्यघोः' (६।४।११३) से 'श्ना' प्रत्यय को ईत्व होता है।*

जि जये (भ्वा०प०)-

(८) विपराभ्यां जेः।१९।

प०वि०-वि-पराभ्याम् ५।२ जेः ५।१।

स०-विश्च पराश्च तौ-विपरौ, ताभ्याम्-विपराभ्याम् (इतरेतर-योगद्वन्द्वः)।

अन्वयः-विपराभ्यां जेः कर्तरि आत्मनेपदम्।

अर्थः-वि-परा-उपसर्गपूर्वाद् जि-धातोः कर्तरि आत्मनेपदं भवति।

उदा०-(वि) विजयते। **(परा)** पराजयते।

आर्यभाषा-अर्थ-(वि-पराभ्याम्) वि और परा अपसर्ग से परे (जेः) जि धातु से (कर्तरि) कर्तृवाच्य में (आत्मनेपदम्) आत्मनेपद होता है।

उदा०-(वि) विजयते। जीतता है। (परा) पराजयते। हारता है।

*सिद्धि-(१) **विजयते।** वि+जि+लट्। वि+जि+त। वि+जि+शप्+त। वि+जि+अ+त। वि+जे+अ+ते। विजयते।*

*यहां 'वि' उपसर्गपूर्वक **'जि जये'** (भ्वादि०प०) धातु से पूर्ववत् 'लट्' प्रत्यय और उसके स्थान में आत्मनेपद 'त' आदेश होता है।*

डुदाञ् दाने (जु०उ०)-

(९) आङो दोऽनास्यविहरणे।२०।

प०वि०-आङः ५।१ दः ५।१ अनास्यविहरणे ७।१।

स०-आस्यस्य विहरणमिति आस्यविहरणम्, न आस्यविहरणमिति अनास्यविहरणम्, तस्मिन्-अनास्यविहरणे (षष्ठीतत्पुरुषगर्भितनञ्तत्पुरुषः)।

अन्वयः-अनास्यविहरणे आङो दः कर्तरि आत्मनेपदम्।

अर्थः-अनास्यविहरणेऽर्थे आङ्-उपसर्गपूर्वाद् दा-धातोः कर्तरि आत्मनेपदं भवति।

उदा०-विद्यामादत्ते।

आर्यभाषा-अर्थ-(अनास्यविहरणे) मुख खोलना अर्थ को छोड़कर (आङः) आङ् उपसर्ग से परे (दः) दा धातु से (कर्तरि) कर्तृवाच्य में (आत्मनेपदम्) आत्मनेपद होता है।

*उदा०-**विद्याम् आदत्ते।** विद्या को ग्रहण करता है।*

*सिद्धि-(१) **आदत्ते।** आङ्+दा+लट्। आ+दा+त। आ+दा+शप्+त। आ+दा+०+त। आ+दा दा+त। आ+द+द्+त। आ+द त्+ते। आदत्ते।*

यहां 'डुदाञ् दाने' (जु०उ०) धातु से पूर्ववत् 'लट्' प्रत्यय और उसके स्थान में आत्मनेपद 'त' आदेश होता है। 'कर्तरि शप्' (३।१।६८) से शप् प्रत्यय और 'जुहोत्यादिभ्यः श्लुः' (२।४।७५) से 'शप्' को श्लु और 'श्लौ' (६।१।१०) से धातु को द्विर्वचन होता है।

*(२) आङ् उपसर्गपूर्वक दा धातु का जहां आस्यविहरण=मुख खोलना अर्थ होता है, वहां उससे परस्मैपद ही होता है। **'व्याददाति पिपीलिका पतङ्गस्य मुखम्'** चींटी पतंग का मुख खोलती है।*

क्रीड़ विहारे (भ्वा०प०)-

(१०) क्रीडोऽनुसम्परिभ्यश्च ।२१।

प०वि०-क्रीडः ५।१ अनु-सम्-परिभ्यः ५।३ च अव्ययपदम्।

स०-अनुश्च सम् च परिश्च ते-अनुसम्परयः, तेभ्यः-अनुसम्परिभ्यः (इतरेतरयोगद्वन्द्वः)।

अनु०-'आङः' इत्यनुवर्तते।

अन्वयः-अनुसम्परिभ्य आङश्च क्रीडः कर्तरि आत्मनेपदम्।

अर्थः-अनु-सम्-परि-उपसर्गपूर्वाद् आङ्-पूर्वाच्च क्रीडो धातोः कर्तरि आत्मनेपदं भवति।

उदा०-(अनु) अनुक्रीडते। **(सम्)** संक्रीडते। **(परि)** परिक्रीडते। **(आङ्)** आक्रीडते।

आर्यभाषा-अर्थ-(अनु-सम्-परिभ्यः) अनु, सम्, परि उपसर्ग से (च) और (आङः) आङ् उपसर्ग से परे (क्रीडः) क्रीड् धातु से (कर्तरि) कर्तृवाच्य में (आत्मनेपदम्) आत्मनेपद होता है।

*उदा०-**अनु-अनुक्रीडते।** अनुकूल खेलता है। **सम्-संक्रीडते।** मिलकर खेलता है। **परि-परिक्रीडते।** सर्वत्र खेलता है। **आ-आक्रीडते।** दिल बहलाता है।*

*सिद्धि-(१) **अनुक्रीडते।** अनु+क्रीड्+लट्। अनु+क्रीड्+शप्+त। अनु+क्रीड्+अ+त। अनुक्रीडते।*

यहां 'अनु' उपसर्गपूर्वक 'क्रीडृ विहारे' (भ्वा०प०) धातु से पूर्ववत् 'लट्' प्रत्यय और 'ल्' के स्थान में आत्मनेपद 'त' होता है।

ष्ठा गतिनिवृत्तौ (भ्वा०प०)-

(११) समवप्रविभ्यः स्थः।२२।

प०वि०-सम्-अव-प्र-विभ्यः ५।३ स्थः ५।१।

स०-सं च अवश्च प्रश्च विश्च ते-समवप्रवयः, तेभ्यः-समवप्रविभ्यः (इतरेतरयोगद्वन्द्वः)।

अन्वयः-समवप्रविभ्यः स्थः कर्तरि आत्मनेपदम्।

अर्थः-सम्-अव-प्र-वि-उपसर्गपूर्वात् स्था-धातोः कर्तरि आत्मनेपदं भवति।

उदा०-**(सम्)** संतिष्ठते। **(अव)** अवतिष्ठते। **(प्र)** प्रतिष्ठते। **(वि)** वितिष्ठते।

आर्यभाषा-अर्थ-(सम्-अव-प्र-विभ्यः) सम्, अव, प्र और वि उपसर्ग से परे (स्थः) स्था धातु से (कर्तरि) कर्तृवाच्य में (आत्मनेपदम्) आत्मनेपद होता है।

*उदा०-सम्-**संतिष्ठते।** मिलकर रहता है। अव-**अवतिष्ठते।** अवस्थित रहता है। प्र-**प्रतिष्ठते।** प्रस्थान करता है। वि-**वितिष्ठते।** विरुद्ध रहता है।*

*सिद्धि-(१) **संतिष्ठते।** सम्+स्था+लट्। सम्+स्था+शप्+त। सम्+तिष्ठ्+अ+ते। संतिष्ठते।*

*यहां सम् उपसर्गपूर्वक **'ष्ठा गतिनिवृत्तौ'** (भ्वा०प०) धातु से पूर्ववत् 'लट्' प्रत्यय और उसके स्थान में आत्मनेपद 'त' आदेश होता है। पूर्ववत् शप्-प्रत्यय और **'पाघ्राध्मा०'** (७।३।७८) से 'स्था' के स्थान में 'तिष्ठ' आदेश होता है।*

(१२) प्रकाशनस्थेयाख्ययोश्च।२३।

प०वि०-प्रकाशन-स्थेयाख्ययोः ७।२ च अव्ययपदम्।

स०-तिष्ठत्यस्मिन्निति स्थेयः, स्थेयस्याऽऽख्या इति स्थेयाख्या। प्रकाशनं च स्थेयाख्या च ते-प्रकाशनस्थेयाख्ये, तयोः-प्रकाशनस्थेयाख्ययोः (षष्ठीतत्पुरुषगर्भितेतरेतरयोगद्वन्द्वः)।

अनु०-'स्थः' इत्यनुवर्तते।

अन्वयः-प्रकाशनस्थेयाख्ययोश्च स्थः कर्तरि आत्मनेपदम्।

अर्थः-प्रकाशने स्थेयाख्यायां चार्थे स्था-धातोः कर्तरि आत्मनेपदं भवति।

उदा०-प्रकाशनम्=स्वाभिप्रायकथनम्। स्थेयाख्या=विवादपद-निर्णायिकस्य प्रकथनम्। **(प्रकाशने)** तिष्ठते कन्या छात्रेभ्यः। तिष्ठते सरस्वती विद्वद्भ्यः। **(स्थेयाख्या)** स त्वयि तिष्ठते। स मयि तिष्ठते।

आर्यभाषा-अर्थ-(प्रकाशन-स्थेयाख्ययोः) अपने अभिप्राय को प्रकाशित करने और विवादास्पद के निर्णायिक अर्थ में विद्यमान (स्थः) स्था धातु से (कर्तरि) कर्तृवाच्य में (आत्मनेपदम्) आत्मनेपद होता है।

*उदा०-(प्रकाशन) **तिष्ठते कन्या छात्रेभ्यः।** कन्या, छात्रों के लिये अपना अभिप्राय प्रकाशित करती है। **तिष्ठते सरस्वती विद्वद्भ्यः।** सरस्वती विद्वानों को अपना रूप प्रकाशित करती है। (स्थेयाख्या) **स त्वयि तिष्ठते।** वह तुझे निर्णायिक मानता है। **स मयि तिष्ठते।** वह मुझे निर्णायिक मानता है।*

(१३) उदोऽनूर्ध्वकर्मणि।२४।

प०वि०-उदः ५।१ अनूर्ध्व-कर्मणि ७।१।

स०-ऊर्ध्वस्य कर्म इति ऊर्ध्वकर्म, न ऊर्ध्वकर्म इति अनूध्वकर्म, तस्मिन्-अनूर्ध्वकर्मणि (षष्ठीतत्पुरुषगर्भितनञ्तत्पुरुषः)।

अनु०-'स्थः' इत्यनुवर्तते।

अन्वयः-अनूर्ध्वकर्मणि उदः स्थः कर्तरि आत्मनेपदम्।

अर्थः-अनूर्ध्वकर्मण्यर्थे वर्तमानाद् उद्-उपसर्गपूर्वात् स्था-धातोः कर्तरि आत्मनेपदं भवति।

उदा०-(उत्) गेहे उत्तिष्ठते। कुटुम्बे उत्तिष्ठते। कर्मशब्दोऽत्र क्रियावाची।

आर्यभाषा-अर्थ-(अनूर्ध्व-कर्मणि) ऊर्ध्व-कर्म को छोड़कर (उदः) 'उत्' उपसर्ग से परे (स्थः) स्था धातु से (कर्तरि) कर्तृवाच्य में (आत्मनेपदम्) आत्मनेपद होता है।

*उदा०-(उत्) **गेहे उत्तिष्ठते।** घर की उन्नति के लिये प्रयत्न करता है। **कुटुम्बे उत्तिष्ठते।** परिवार की उन्नति के लिये प्रयत्न करता है।*

*यहां ऊर्ध्व-कर्म का निषेध इसलिये किया गया है कि यहां आत्मनेपद न हो-**देवदत्त आसनाद् उत्तिष्ठति। देवदत्त आसन से खड़ा होता है।***

(१४) उपान्मन्त्रकरणे।२५।

प०वि०-उपात् ५ ।१ मन्त्रकरणे ७ ।१ ।

स०-मन्त्रेण करणमिति मन्त्रकरणम्, तस्मिन्-मन्त्रकरणे (तृतीयातत्पुरुषः)।

अनु०-'स्थः' इत्यनुवर्तते।

अन्वयः-मन्त्रकरणे उपात् स्थः कर्तरि आत्मनेपदम्।

अर्थः-मन्त्रकरणे=मन्त्रेणाऽनुष्ठानेऽर्थे वर्तमानाद् उप-उपसर्गपूर्वात् स्था-धातोः कर्तरि आत्मनेपदं भवति।

उदा०-(उप) उपतिष्ठते। ऐन्द्रया गार्हपत्यमुपतिष्ठते। आग्नेय्या-ऽऽग्नीध्रमुपतिष्ठते।

आर्यभाषा-अर्थ-(मन्त्र-करणे) मन्त्रकरण अर्थ में विद्यमान (उपात्) उप उपसर्ग से परे (स्थः) स्था धातु से (कर्तरि) कर्तृवाच्य में (आत्मनेपदम्) आत्मनेपद होता है।

उदा०-(उप) उपतिष्ठते। ऐन्द्रया गार्हपत्यमुपतिष्ठते। इन्द्रदेवतावाली ऋचा के द्वारा गार्हपत्य अग्नि को प्राप्त करता है। आग्नेय्याऽऽग्नीध्रमुपतिष्ठते। अग्निदेवतावाली ऋचा से आग्नीध्र को प्राप्त करता है।

यहां मन्त्रकरण का कथन इसलिये किया गया है कि यहां आत्मनेपद न हो- भर्तारमुपतिष्ठति यौवनेन। यौवन से पति को प्राप्त करती है।

(१५) अकर्मकाच्च।२६।

प०वि०-अकर्मकात् ५ ।१ च अव्ययपदम्।

स०-न विद्यते कर्म यस्य सः-अकर्मकः, तस्मात्-अकर्मकात् (बहुव्रीहिः)।

अनु०-'उपात्, स्थः' इत्यनुवर्तते।

अन्वयः-उपाद् अकर्मकाच्च स्थः कर्तरि आत्मनेपदम्।

अर्थः-उप-उपसर्गपूर्वाद् अकर्मकात् स्था-धातोः कर्तरि आत्मनेपदं भवति।

उदा०-यावद्भुक्तम् उपतिष्ठते देवदत्तः। यावदोदनमुपतिष्ठते यज्ञदत्तः।

आर्यभाषा-अर्थ-(उपात्) उप-उपसर्ग से परे (अकर्मकात्) अकर्मक (स्थः) स्था धातु से (कर्तरि) कर्तृवाच्य में (आत्मनेपदम्) आत्मनेपद होता है।

उदा०-यावद्भुक्तमुपतिष्ठते देवदत्तः। देवदत्त प्रत्येक भोजन में उपस्थित होता है। यावदोदनमुपतिष्ठते यज्ञदत्तः। यज्ञदत्त प्रत्येक ओदन-भोजन में उपस्थित होता है।

सिद्धि-उपतिष्ठते। यहां उप उपसर्गपूर्वक अकर्मक स्था धातु से इस सूत्र से आत्मनेपद है।

तप सन्तापे (भ्वा०प०)-

(१६) उद्विभ्यां तपः।२७।

प०वि०-उद्-विभ्याम् ५।२ तपः ५।१।

स०-उत् च विश्च तौ-उद्वी, ताभ्याम्-उद्विभ्याम् (इतरेतरयोगद्वन्द्वः)।

अनु०-'अकर्मकात्' इत्यनुवर्तते।

अन्वयः-उद्विभ्याम् अकर्मकात् तपः कर्तरि आत्मनेपदम्।

अर्थः-उद्-वि-उपसर्गपूर्वाद् अकर्मकात् तपो धातोः कर्तरि आत्मनेपदं भवति।

उदा०-(उत्) उत्तपते। **(वि)** वितपते।

आर्यभाषा-अर्थ-(उद्-विभ्याम्) उत् और वि उपसर्ग से परे (अकर्मकात्) अकर्मक (तपः) तप धातु से (कर्तरि) कर्तृवाच्य में (आत्मनेपदम्) आत्मनेपद होता है।

*उदा०-उत्-**उत्तपते**। अतिसंतापयुक्त होता है। वि-**वितपते**। सन्ताप को हटाता है।*

*सिद्धि-(१) **उत्तपते**। उत्+तप्+लट्। उत्+तप्+शप्+त। उत्+तप्+अ+ते। उत्तपते।*

*यहां 'उत्' उपसर्गपूर्वक 'तप संतापे' (भ्वा०प०) धातु से पूर्ववत् 'लट्' प्रत्यय और उसके स्थान में आत्मनेपद 'त' आदेश होता है। ऐसे ही-**वितपते**।*

यम उपरमे (भ्वा०प०) हन् हिंसागत्योः (अ०प०)-

(१७) आङो यमहनः।२८।

प०वि०-आङः ५।१ यमहनः ५।१।

स०-यमश्च हन् च एतयोः समाहारः-यमहन्, तस्मात्-यमहनः (समाहारद्वन्द्वः)।

अनु०-'अकर्मकात्' इत्यनुवर्तते।

अन्वयः-आङोऽकर्मकाद्यमहनः कर्तरि आत्मनेपदम्।

अर्थः-आङ्-उपसर्गपूर्वाभ्याम् अकर्मकाभ्यां यमहन्भ्यां धातुभ्यां कर्तरि आत्मनेपदं भवति।

उदा०-(**यम्**) आयच्छते। (**हन्**) आहते।

आर्यभाषा-अर्थ-(आङः) आङ् उपसर्ग से परे (अकर्मकात्) अकर्मक (यम-हनः) यम् और हन् धातु से (कर्तरि) कर्तृवाच्य में (आत्मनेपदम्) आत्मनेपद होता है।

*उदा०-**यम्-आयच्छते।** हाथ पसारता है। **हन्-आहते।** ठोकता है।*

*सिद्धि-(१) **आयच्छते।** आङ्+यम्+लट्। आ+यम्+शप्+त। आ+यम्+अ+त। आ+यच्छ+अ+ते। आयच्छते।*

*यहां 'आङ्' उपसर्गपूर्वक '**यम उपरमे**' (भ्वा०प०) धातु से पूर्ववत् 'लट्' प्रत्यय और उसके स्थान में आत्मनेपद 'त' आदेश होता है। पूर्ववत् शप् प्रत्यय और '**इषुगमियमां छः**' (७।३।७७) से 'यम्' धातु के 'म्' को 'छ्' आदेश होता है।*

*(२) **आहते।** आङ्+हन्+लट्। आ+हन्+शप्+त। आ+हन्+०+त। आ+ह+ते। आहते।*

*यहां 'आङ्' उपसर्गपूर्वक '**हन् हिंसागत्योः**' (अ०प०) धातु से पूर्ववत् 'लट्' प्रत्यय और उसके स्थान में आत्मनेपद 'त' आदेश होता है। पूर्ववत् शप् प्रत्यय और '**अदिप्रभृतिभ्यः शपः**' (२।४।७२) से शप् का लुक् हो जाता है। '**अनुदात्तोपदेश०**' (६।४।३७) से हन् के अनुनासिक 'न्' का लोप होता है।*

गम्लृ गतौ (भ्वा०प०) ऋच्छ गतौ (तु०प०)-

(१८) समो गम्यृच्छिभ्याम्।२६।

प०वि०-समः ५।१ गमि-ऋच्छिभ्याम् ५।२।

स०-गमिश्च ऋच्छिश्च तौ-गम्यृच्छी, ताभ्याम्-गम्यृच्छिभ्याम् (इतरेतरयोगद्वन्द्वः)।

अनु०-'अकर्मकात्' इत्यनुवर्तते।

अन्वयः-समोऽकर्मकाभ्यां गम्यृच्छिभ्यां कर्तरि आत्मनेपदम्।

अर्थः-सम्-उपसर्गपूर्वाभ्याम् अकर्मकाभ्यां गमि-ऋच्छिभ्यां धातुभ्यां कर्तरि आत्मनेपदं भवति।

उदा०-(**गमि**) सङ्गच्छते। (**ऋच्छि**) समृच्छते।

आर्यभाषा-अर्थ-(समः) सम् उपसर्ग से परे (अकर्मकात्) अकर्मक (गमि-ऋच्छिभ्याम्) गमि और ऋच्छि धातु से (कर्तरि) कर्तृवाच्य में (आत्मनेपदम्) आत्मनेपद होता है।

उदा०-(गमि) सङ्गच्छते। मिलता है। (ऋच्छि) समृच्छते। कठोर होता है।

सिद्धि-(१) संगच्छते। सम्+गम्+लट्। सम्+गम्+शप्+त। सम्+गम्+अ+त। सम्+गच्छ्+अ+ते। संगच्छते।

*यहां 'सम्' उपसर्गपूर्वक 'गम्लृ गतौ' (भ्वादि) धातु से पूर्ववत् 'लट्' प्रत्यय और उसके स्थान में आत्मनेपद 'त' आदेश होता है। '**इषुगमियमां छः**' (७।३।७७) से गम् के 'म्' को 'छ्' आदेश होता है। संगच्छते=मिलता है। '**ऋच्छ गतौ**' (तु०प०) धातु से-समृच्छते।*

ह्वेञ् स्पर्धायां शब्दे च (भ्वा०उ०)-

(१६) निसमुपविभ्यो ह्वः।३०।

प०वि०-नि-सम्-उप-विभ्यः ५।३ ह्वः ५।१।

स०-निश्च सं च उपश्च विश्च ते-निसमुपवयः, तेभ्यः-निसमुपविभ्यः (इतरेतरयोगद्वन्द्वः)।

अन्वयः-निसमुपविभ्यो ह्वः कर्तरि आत्मनेपदम्।

अर्थः-नि-सम्-उप-वि-उपसर्गपूर्वाद् ह्वा-धातोः परः कर्तरि आत्मनेपदं भवति।

उदा०-(**नि**) निह्वयते। (**सम्**) संह्वयते। (**उप**) उपह्वयते। (**वि**) विह्वयते।

आर्यभाषा-अर्थ-(नि-सम्-उप-विभ्यः) नि, सम्, उप और वि उपसर्ग से परे (ह्वः) ह्वा धातु से (कर्तरि) कर्तृवाच्य में (आत्मनेपदम्) आत्मनेपद होता है।

उदा०-(नि) निह्वयते। (सम्) संह्वयते। (उप) उपह्वयते। (वि) विह्वयते। युद्ध के लिये बुलाता है।

*सिद्धि-(१) **निह्वयते**। नि+ह्वे+लट्। नि+ह्वे+शप्+त। नि+ह्वे+अ+त। निह्वयते।*

*यहां 'नि' उपसर्गपूर्वक 'ह्वेञ् स्पर्धायां शब्दे च' (भ्वा०उ०) धातु से पूर्ववत् 'लट्' प्रत्यय और उसके स्थान में आत्मनेपद 'त' आदेश होता है। पूर्ववत् शप् प्रत्यय और '**एचोऽयवायावः**' (६।१।७८) से धातु के 'ए' को **अय्** आदेश होता है।*

(२०) स्पर्धायामाङः।३१।

प०वि०-स्पर्धायाम् ७।१ आङः ५।१।

अनु०-'ह्वः' इत्यनुवर्तते।

अन्वयः-स्पर्धायाम् आङो ह्वः कर्तरि आत्मनेपदम्।

अर्थः-आङ्-उपसर्गपूर्वात् स्पर्धायामर्थे वर्तमानाद् ह्वा-धातोः कर्तरि आत्मनेपदं भवति।

उदा०-कृष्णश्चाणूरमाह्वयते। मल्लो मल्लमाह्वयते।

आर्यभाषा-अर्थ-(स्पर्धायाम्) स्पर्धा अर्थ में विद्यमान (आङ्) आङ् उपसर्ग से परे (ह्वः) ह्वा धातु से (कर्तरि) कर्तृवाच्य में (आत्मनेपदम्) आत्मनेपद होता है। दूसरे को पराजित करने की इच्छा को 'स्पर्धा' कहते हैं।

*उदा०-**कृष्णश्चाणूरमाह्वयते।** श्रीकृष्ण चाणूर को पराजित करने की इच्छा से युद्ध के लिये बुलाता है। **मल्लो मल्लमाह्वयते।** एक पहलवान दूसरे पहलवान को पराजित करने की इच्छा से मल्लयुद्ध के लिये बुलाता है।*

डुकृञ् करणे (तना०उ०)-

(२१) गन्धनावक्षेपणसेवनसाहसिक्यप्रतियत्न-प्रकथनोपयोगेषु कृञः।३२।

प०वि०-गन्धन-अवक्षेपण-सेवन-साहसिक्य-प्रतियत्न-प्रकथन-उपयोगेषु ७।३ कृञः ५।१।

स०-गन्धनं च अवक्षेपणं च सेवनं च साहसिक्यं च प्रतियत्नश्च प्रकथनं च उपयोगश्च ते-गन्धनावक्षेपणसेवनसाहसिक्यप्रतियत्न-प्रकथनोपयोगाः, तेषु-गन्धनावक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनोपयोगेषु (इतरेतरयोगद्वन्द्वः)।

अन्वयः-गन्धन०उपयोगेषु कृञः कर्तरि आत्मनेपदम्।

अर्थः-गन्धन-अवक्षेपण-सेवन-साहसिक्य-प्रतियत्न-प्रकथन-उपयोगेष्वर्थेषु वर्तमानात् कृञो धातोः कर्तरि आत्मनेपदं भवति।

उदा०-(१) गन्धनम् (सूचनम्) उत्कुरुते। उदाकुरुते। (२) **अवक्षेपणम् (भर्त्सनम्)** श्येनो वर्तिकामुदाकुरुते। (३) सेवनम् (सेवा)

गणकान् उपकुरुते। शिष्य आचार्यमुपकुरुते। (४) साहसिक्यम् (साहसिक कर्म) परदारान् प्रकुरुते। (५) प्रतियत्नः (गुणान्तराधानम्) एधो दकस्योपस्कुरुते। (६) प्रकथनम् (प्रवचनम्) गाथाः प्रकुरुते। जनापवादान् प्रकुरुते। (७) उपयोगः (धर्मकार्ये विनियोगः) शतं प्रकुरुते। सहस्रं प्रकुरुते।

आर्यभाषा-अर्थ- *(गन्धन०) गन्धन, अवक्षेपण, सेवन, साहसिक्य, प्रतियत्न, प्रकथन और उपयोग अर्थ में विद्यमान (कृञः) कृञ् धातु से (कर्तरि) कर्तृवाच्य में (आत्मनेपदम्) आत्मनेपद होता है।*

(१) गन्धन। *हिंसा। अपकार से युक्त हिंसात्मक सूचना। उत्कुरुते। उदाकुरुते। सूचित करता है।*

(२) अवक्षेपण। *भर्त्सन=धमकाना। श्येनो वर्तिकामुदाकुरुते। बाज बटेर को धमकाता है।*

(३) सेवन। *सेवा करना। गणकान् उपकुरुते। गणक लोगों की सेवा करता है। गणक=ज्योतिषी। महामात्रानुपकुरुते। महापुरुषों की सेवा करता है।*

(४) साहसिक्य। *साहसिक कार्य करना। परदारान् प्रकुरुते। परदाराओं के प्रति साहसपूर्वक प्रवृत्त होता है।*

(५) प्रतियत्न। *विद्यमान गुण को बदलना। एधो दकस्योपस्कुरुते। इन्धन जल के गुण को बदलता है। दक=उदक (जल)।*

(६) प्रकथन। *जोर से कहना। गाथाः प्रकुरुते। गाथाओं को जोर से कहता है। जनापवादान् प्रकुरुकुते। जन-अपवादों को जोर से कहता है।*

(७) उपयोग। *धर्मार्थ व्यय करना। शतं प्रकुरुते। सौ रुपये धर्मार्थ व्यय करता है। सहस्रं प्रकुरुते। हजार रुपये धर्मार्थ व्यय करता है।*

सिद्धि-(१) ***उत्कुरुते।*** *उत्+कृ+लट्। उत्+कृ+उ+त। उत्+कर्+उ+त। उत्+कुर्+उ+ते। उत्कुरुते।*

यहां 'उत्' उपसर्ग से परे ***'डुकृञ् करणे'*** *(त०उ०) धातु से पूर्ववत् 'लट्' प्रत्यय और उसके स्थान में आत्मनेपद 'त' आदेश होता है।* ***'तनादिकृञ्भ्य उः'*** *(३।१।७९) से यहां उ-प्रत्यय होता है। कृ धातु को* ***'सार्वधातुकार्धधातुकयोः'*** *(७।३।८४) से गुण और* ***'अत उत् सार्वधातुके'*** *(६।४।११०) से 'अ' को उकार आदेश होता है।*

विशेष- *धातुपाठ में 'कृ' धातु करने अर्थ में पढ़ी गई है किन्तु* ***'अनेकार्था हि धातवो भवन्ति'*** *इस महाभाष्य-वचन से धातुओं के अनेक अर्थ होते हैं। यहां 'कृ' धातु के 'गन्धन' आदि सात अर्थ बतलाये गये हैं।*

(२२) अधेः प्रसहने।३३।

प०वि०-अधे: ५।१ प्रसहने ७।१।

अनु०-'कृञः' इत्यनुवर्तते।

अन्वयः-प्रहसनेऽधेः कृञः कर्तरि आत्मनेपदम्।

अर्थः-अधि-उपसर्गपूर्वात् प्रहसनेऽर्थे वर्तमानात् कृञो धातोः कर्तरि आत्मनेपदं भवति।

उदा०-प्रसहनम्=क्षमाऽभिभवो वा। शत्रुमधिकुरुते।

आर्यभाषा-अर्थ-(प्रसहने) क्षमा अथवा अभिभव अर्थ में विद्यमान, (अधेः) अधि उपसर्ग से परे (कृञः) कृञ् धातु से (कर्तरि) कर्तृवाच्य में (आत्मनेपदम्) आत्मनेपद होता है।

उदा०-शत्रुमधिकुरुते। शत्रु को क्षमा करता है अथवा शत्रु को दबाता है।

(२३) वेः शब्दकर्मणः।३४।

प०वि०-वे: ५।१ शब्दकर्मण: ५।१।

स०-शब्दः कर्म यस्य सः-शब्दकर्म, तस्मात्-शब्दकर्मणः (बहुव्रीहिः)।

अनु०-'कृञः' इत्यनुवर्तते।

अन्वयः-वेः शब्दकर्मणः कृञः कर्तरि आत्मनेपदम्।

अर्थः-वि-उपसर्गपूर्वात् शब्दकर्मकात् कृञो धातोः कर्तरि आत्मनेपदं भवति।

उदा०-क्रोष्टा स्वरान् विकुरुते।

आर्यभाषा-अर्थ-(वेः) वि उपसर्ग से परे (शब्दकर्मणि) शब्दकर्मवाली (कृञः) कृञ् धातु से (कर्तरि) कर्मवाच्य में (आत्मनेपदम्) आत्मनेपद होता है।

*उदा०-**क्रोष्टा स्वरान् विकुरुते।** गीदड़ स्वरों को बिगाड़ता है।*

*'शब्दकर्म' का कथन इसलिये किया है कि यहां आत्मनेपद न हो-**चित्तं विकरोति कामः।** काम चित्त को विकृत करता है।*

***सिद्धि-विकुरुते।** वि+कृ+लट्। पूर्ववत्।*

(२४) अकर्मकाच्च।३५।

प०वि०-अकर्मकात् ५ ।१ च अव्ययपदम्।

स०-न विद्यते कर्म यस्य सः-अकर्मकः, तस्मात्-अकर्मकात् (बहुव्रीहिः)।

अनु०-'वेः, कृञः' इत्यनुवर्तते।

अन्वयः-वेरकर्मकाच्च कृञः कर्तरि आत्मनेपदम्।

अर्थः-वि-उपसर्गपूर्वाद् अकर्मकात् कृञो धातोः कर्तरि आत्मनेपदं भवति।

उदा०-विकुर्वते सैन्धवाः।

आर्यभाषा-अर्थ-(वेः) वि उपसर्ग से परे (अकर्मकात्) अकर्मक (कृञः) कृञ् धातु से (कर्तरि) कर्तृवाच्य में (आत्मनेपदम्) आत्मनेपद होता है।

उदा०-विकुर्वते सैन्धवाः। घोड़े हिनहिनाते हैं।

णीञ् प्रापणे (भ्वा०उ०)-

(२५) सम्माननोत्सञ्जनाचार्यकरणज्ञानभृति-विगणनव्ययेषु नियः।३६।

प०वि०-सम्मानन-उत्सञ्जन-आचार्यकरण-ज्ञान-भृति-विगणन-व्ययेषु ७।३ नियः ५।१।

स०-सम्माननं च उत्सञ्जनं च आचार्यकरणं च ज्ञानं च भृतिश्च विगणनं च व्ययश्च ते-सम्माननोत्सञ्जनाचार्यकरणज्ञानभृतिविगणनव्ययाः, तेषु-सम्माननोत्सञ्जनाचार्यकरणज्ञानभृतिविगणनव्ययेषु (इतरेतरयोगद्वन्द्वः)।

अन्वयः-सम्मानन०व्ययेषु नियः कर्तरि आत्मनेपदम्।

अर्थः-सम्मानोत्सञ्जनाचार्यकरणज्ञानभृतिविगणनव्ययेष्वर्थेषु वर्तमानाद् नियो धातोः कर्तरि आत्मनेपदं भवति।

उदा०-(सम्मानने) शास्त्रे नयते। शास्त्रसिद्धान्तं शिष्येभ्यः प्रापयतीत्यर्थः। तेन च शिष्यसम्मानं फलितं भवति। (उत्सञ्जने) दण्डमुन्नयते। उत्क्षिपतीत्यर्थः। (आचार्यकरणे) माणवकमुपनयते। माणवकं विधिनाऽऽत्मसमीपं प्रापयतीत्यर्थः। उपनयनपूर्वकाध्यापनेन हि उपनेतरि

आचार्यत्वं क्रियते। (ज्ञाने) तत्त्वं नयते। तत्त्वं निश्चिनोतीत्यर्थः। (भृतौ) कर्मकरानुपनयते। भृतिदानेन तान् स्वसमीपं प्रापयतीत्यर्थः। (विगणने) करं विनयते। विगणनम्=ऋणादेर्निर्यातनम्। राज्ञे देयं भागं परिशोधयतीत्यर्थः। (व्यये) शतं विनयते। धर्मार्थं शतं विनुयङ्क्ते इत्यर्थः।

आर्यभाषा-अर्थ-(सम्मानन०) सम्मानन, उत्सञ्जन, आचार्यकरण, ज्ञान, भृति, विगणन और व्यय अर्थ में विद्यमान (नियः) नी धातु से (कर्तरि) कर्तृवाच्य में (आत्मनेपदम्) आत्मनेपद होता है।

उदा०-(सम्मानन) शास्त्रे नयते। आचार्य शास्त्रसिद्धान्त को शिष्यजनों को प्राप्त कराता है, उससे शिष्यों का सम्मान फलित होता है। (उत्सञ्जन) दण्डम् उन्नयते। दण्ड को उठाता है। (आचार्यकरण) माणवकम् उपनयते। आचार्य बालक को विधिपूर्वक अपने समीप रखता है। उपनयनपूर्वक अध्यापन से उपनेता आचार्य बनता है।[1] (ज्ञान) तत्त्वं नयते। तत्त्व का निश्चय करता है। (भृति) कर्मकरान् उपनयते। वेतन के दान से कर्मचारियों को अपने पास रखता है। (विगणन) करं विनयते। विगणन का अर्थ ऋण आदि का चुकाना है। राजा के लिये देयभाग को चुकाकर साफ करता है। (व्यय) शतं विनयते। धर्म के लिये सौ रुपये लगाता है। व्यय शब्द का अर्थ धर्मकार्य के लिये खर्च करना है।

सिद्धि-नयते। नी++लट्+। नी+शप्+त। ने+अ+त। नय्+अ+ते। नयते।

यहां 'णीञ् प्रापणे' (भ्वा०उ०) धातु से 'वर्तमाने लट्' (३।२।१२३) से 'लट्' प्रत्यय और उसके स्थान में आत्मनेपद 'त' आदेश होता है। पूर्ववत् शप् प्रत्यय है।

(२६) कर्तृस्थे चाशरीरे कर्मणि।३७।

प०वि०-कर्तृस्थे ७।१ च अव्ययपदम्, अशरीरे ७।१ कर्मणि ७।१।

स०-कर्तरि तिष्ठतीति कर्तृस्थः, तस्मिन् कर्तृस्थे (उपपदसमासः)। न शरीरम्, अशरीरम्, तस्मिन् अशरीरे (नञ्तत्पुरुषः)।

अनु०-'नियः' इत्यनुवर्तते।

अन्वयः-कर्तृस्थेऽशरीरे कर्मणि च नियः कर्तरि आत्मनेपदम्।

अर्थः-कर्तृस्थेऽशरीरे कर्मणि च सति नियो धातोः कर्तरि आत्मनेपदं भवति।

उदा०-क्रोधं विनयते। मन्युं विनयते। क्रोधं मन्युं वाऽपगमयतीत्यर्थः।

---

(१) उपनीय तु यः शिष्यं वेदमध्यापयेद् द्विजः।
सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते।। (मनुस्मृति)

आर्यभाषा-अर्थ-(कर्तृस्थे) कर्ता में अवस्थित (अशरीरे) शरीर से भिन्न (कर्मणि) कर्म होने पर (च) भी (नियः) नी धातु से (कर्तरि) कर्तृवाच्य में (आत्मनेपदम्) आत्मनेपद होता है।

*उदा०-**क्रोधं विनयते।** क्रोध को दूर करता है। **मन्युं विनयते।** मन्यु को दूर करता है। क्रोध वा मन्यु को हटाना कोई शारीरिक कर्म नहीं है, किन्तु वह देवदत्त आदि कर्ता में अवस्थित मानसिक कर्म है।*

*सिद्धि-**विनयते।** वि+नी+लट्। वि+नी+शप्+त। वि+ने+अ+ते। विनयते।*

*यहां 'वि' उपसर्गपूर्वक '**णीञ् प्रापणे**' (भ्वादि०) धातु से '**वर्तमाने लट्**' (३।२।१२३) से 'लट्' प्रत्यय और उसके स्थान में आत्मनेपद 'त' आदेश होता है। पूर्ववत् शप् प्रत्यय होता है।*

क्रमु पादविक्षेपे (भ्वा०प०)-

(२७) वृत्तिसर्गतायनेषु क्रमः।३८।

प०वि०-वृत्ति-सर्ग-तायनेषु ७।३ क्रमः ५।१।

स०-वृत्तिश्च सर्गश्च तायनं च तानि-वृत्तिसर्गतायनानि। तेषु-वृत्तिसर्गतायनेषु (इतरेतरयोगद्वन्द्वः)।

अन्वयः-वृत्तिसर्गतायनेषु क्रमः कर्तरि आत्मनेपदम्।

अर्थः-वृत्तिसर्गतायनेष्वर्थेषु वर्तमानात् क्रमो धातोः कर्तरि आत्मनेपदं भवति।

उदा०-(वृत्तौ) ऋचि क्रमतेऽस्य बुद्धिः। वृत्तिरप्रतिबन्धः। न प्रतिहन्यते, इत्यर्थः। (सर्गे) व्याकरणाध्ययनाय क्रमते। सर्ग उत्साहः। उत्सहते, इत्यर्थः। (तायने) क्रमन्तेऽस्मिन् शास्त्राणि। तायनं स्फीतता। स्फीतानि भवन्तीत्यर्थः।

आर्यभाषा-अर्थ-(वृत्ति०) वृत्ति, सर्ग और तायन अर्थ में विद्यमान (क्रमः) क्रम धातु से (कर्तरि) कर्तृवाच्य में (आत्मनेपदम्) आत्मनेपद होता है।

*उदा०-(वृत्ति) **ऋचि क्रमतेऽस्य बुद्धिः।** ऋग्वेद में इसकी बुद्धि गति करती है, रुकती नहीं है। वृत्ति का अर्थ न रुकना है। (सर्ग) **व्याकरणाध्ययनाय क्रमते।** व्याकरणशास्त्र के अध्ययन के लिये उत्साह करता है। सर्ग का अर्थ उत्साह है। (तायन) **क्रमन्तेऽस्मिन् शास्त्राणि।** इस सुयोग्य शिष्य में शास्त्र वृद्धि को प्राप्त होते हैं।*

*सिद्धि-**क्रमते।** क्रम्+लट्। क्रम्+शप्+त। क्रम्+अ+ते। क्रमते।*

यहां 'क्रमु पादविक्षेपे' (भ्वा०प०) धातु से 'वर्तमाने लट्' (३।२।१२३) से 'लट्' प्रत्यय और उसके स्थान में आत्मनेपद 'त' आदेश होता है। पूर्ववत् 'शप्' प्रत्यय है।

(२८) उपपराभ्याम्।३६।

प०वि०-उप-पराभ्याम् ५।२।

स०-उपश्च पराश्च तौ-उपपरौ। ताभ्याम्-उपपराभ्याम् (इतरेतरयोगद्वन्द्वः)।

अनु०-'वृत्तिसर्गतायनेषु क्रमः' इत्यनुवर्तते।

अन्वयः-वृत्तिसर्गतायनेषु उपपराभ्यां क्रमः कर्तरि आत्मनेपदम्।

अर्थः-वृत्तिसर्गतायनेष्वर्थेषु वर्तमानाद् उप-परा-उपसर्गपूर्वात् क्रमो धातोः कर्तरि आत्मनेपदं भवति।

उदा०-(वृत्तौ) उपक्रमते। पराक्रमते। **न प्रतिहन्यते इत्यर्थः।** (सर्गे) उपक्रमते। पराक्रमते। **उत्सहते इत्यर्थः।** (तायने) उपक्रमते। पराक्रमते। **स्फीतीभवतीत्यर्थः।**

आर्यभाषा-अर्थ-(वृत्ति०) वृत्ति, सर्ग और तायन अर्थ में विद्यमान (उपपराभ्याम्) उप और परा उपसर्ग से परे (क्रमः) क्रम धातु से (कर्तरि) कर्तृवाच्य में (आत्मनेपदम्) आत्मनेपद होता है।

उदा०-(वृत्ति) उपक्रमते। पराक्रमते। रुकता नहीं है। (सर्ग) उपक्रमते। पराक्रमते। उत्साह करता है। (तायन) उपक्रमते। पराक्रमते। बढ़ता है।

सिद्धि-उपक्रमते। *उप+क्रम+लट्। उप+क्रम+शप्+त। उप+क्रम+अ+ते। उपक्रमते। यहां 'उप' उपसर्ग से परे 'क्रमु पादविक्षेपे' (भ्वा०प०) धातु से 'वर्तमाने लट्' से लट् प्रत्यय और उसके स्थान में आत्मनेपद 'त' आदेश होता है। ऐसे ही-परा+क्रमते।* ***पराक्रमते।***

(२६) आङ उद्गमने।४०।

प०वि०-आङः ५।१ उद्गमने ७।१।

अनु०-'क्रमः' इत्यनुवर्तते।

अन्वयः-उद्गमने आङः क्रमः कर्तरि आत्मनेपदम्।

अर्थः-उद्गमनेऽर्थे वर्तमानाद् आङ्-उपसर्गपूर्वात् क्रमो धातोः कर्तरि आत्मनेपदं भवति।

उदा०-आक्रमते आदित्यः। आक्रमते चन्द्रमाः। उदयते इत्यर्थः।

आर्यभाषा-अर्थ-(उद्गमने) उदय होने अर्थ में विद्यमान (आङः) आङ् उपसर्ग से परे (क्रमः) क्रम धातु से (कर्तरि) कर्तृवाच्य में (आत्मनेपदम्) आत्मनेपद होता है।

उदा०-आक्रमते आदित्यः। सूर्य उदय होता है। आक्रमते चन्द्रमाः। चन्द्रमा उदय होता है।

सिद्धि-आक्रमते। आङ्+क्रम्+लट्। आ+क्रम्+शप्+त। आ+क्रम+अ+ते। आक्रमते।

यहां 'क्रमु पादविक्षेपे' (भ्वा०प०) धातु से 'लट्' प्रत्यय और उसके स्थान में 'आत्मनेपद' आदेश 'त' होता है।

(३०) वेः पादविहरणे।४१।

प०वि०-वेः ५।१ पाद-विहरणे ७।१।

स०-पादस्य विहरणमिति पादविहरणम्, तस्मिन्-पादविहरणे (षष्ठीतत्पुरुषः)। विहरणम्=विक्षेपः।

अनु०-'क्रमः' इत्यनुवर्तते।

अन्वयः-पादविहरणे वेः क्रमः कर्तरि आत्मनेपदम्।

अर्थः-पादविहरणेऽर्थे वर्तमानाद् वि-परस्मात् क्रमो धातोः कर्तरि आत्मनेपदं भवति।

उदा०-सुष्ठु विक्रमते वाजी। साधु विक्रमते वाजी। अश्वः साधु पादविक्षेपं करोतीत्यर्थः।

आर्यभाषा-अर्थ-(पादविहरणे) पांव से चलने अर्थ में विद्यमान, वि उपसर्ग से परे (क्रमः) क्रम् धातु से (कर्तरि) कर्तृवाच्य में (आत्मनेपदम्) आत्मनेपद होता है।

उदा०-सुष्ठु विक्रमते वाजी। घोड़ा अच्छे प्रकार से चलता है। अश्व आदि की गतिविशेष को विक्रमण कहते हैं।

सिद्धि-विक्रमते। वि+क्रम्+लट्। वि+क्रम्+शप्+त। वि+क्रम्+अ+ते। विक्रमते।

यहां 'वि' उपसर्ग से परे 'क्रमु पादविक्षेपे' (भ्वा०प०) धातु से 'लट्' प्रत्यय और उसके स्थान में आत्मनेपद 'त' आदेश होता है।

(३१) प्रोपाभ्यां समर्थाभ्याम्।४२।

प०वि०-प्र-उपाभ्याम् ५।२ समर्थाभ्याम् ५।२।

स०-प्रश्च उपश्च तौ-प्रोपौ, ताभ्याम्-प्रोपाभ्याम् (इतरेतरयोगद्वन्द्वः)।

अन्वयः-समर्थाभ्यां प्रोपाभ्यां क्रमः कर्तरि आत्मनेपदम्।

अर्थः-समर्थाभ्याम्=तुल्यार्थाभ्यां प्र-उपाभ्यामुपसर्गाभ्यां परस्मात् क्रमो धातोः कर्तरि आत्मनेपदं भवति।

उदा०-(प्रात्) प्रक्रमते भोक्तुम्। (उपात्) उपक्रमते भोक्तुम्। आरभते इत्यर्थः। आदिकर्मणि प्र-उपौ समर्थौ=तुल्यार्थौ भवतः।

आर्यभाषा-अर्थ-(समर्थाभ्याम्) समान अर्थवाले (प्र-उपाभ्याम्) प्र और उप उपसर्ग से परे (क्रमः) क्रम् धातु से (कर्तरि) कर्तृवाच्य में (आत्मनेपदम्) आत्मनेपद होता है।

उदा०-(प्र) प्रक्रमते भोक्तुम्। खाना आरम्भ करता है। आदिकर्म=क्रिया को आरम्भ करने अर्थ में प्र और उप उपसर्ग समानार्थक होते हैं।

*सिद्धि-प्रक्रमते। प्र+क्रम्+लट्। पूर्ववत्। ऐसे ही-**उपक्रमते**।*

(३२) अनुपसर्गाद् वा।४३।

प०वि०-अनुपसर्गात् ५।१, वा अव्ययपदम्।

स०-न उपसर्ग इति अनुपसर्गः, तस्मात्-अनुपसर्गात् (नञ्तत्पुरुषः)

अनु०-'क्रमः' इत्यनुवर्तते।

अन्वयः-अनुपसर्गात् कृञः कर्तरि वाऽऽत्मनेपदम्।

अर्थः-अनुपसर्गात्=उपसर्गरहितात् क्रमो धातोः परो कर्तरि आत्मनेपदं भवति।

उदा०-क्रमते। क्रामति। गच्छतीत्यर्थः।

***आर्यभाषा-अर्थ**-(अनुपसर्गात्) उपसर्ग से रहित (क्रमः) क्रम् धातु से (कर्तरि) कर्तृवाच्य में (वा) विकल्प से (आत्मनेपदम्) आत्मनेपद होता है।*

उदा०-क्रमते। क्रामति।

*सिद्धि-(१) **क्रमते**। क्रम्+लट्। क्रम्+शप्+त। क्रम्+अ+ते। क्रमते। यहां '**क्रमु पादविक्षेपे**' (भ्वा०प०) धातु से 'लट्' प्रत्यय और उसके स्थान में आत्मनेपद 'त' होता है।*

*(२) **क्रामति**। क्रम्+लट्। क्रम्+शप्+तिप्। क्रम्+अ+ति। क्राम्+अ+ति। क्रामति।*

*यहां '**क्रमु पादविक्षेपे**' (भ्वा०प०) धातु से 'लट्' प्रत्यय और उसके स्थान में परस्मैपद 'तिप्' आदेश होता है। '**क्रमः परस्मैपदेषु**' (७।३।७६) से 'क्रम्' धातु को दीर्घ होता है।*

ज्ञा अवबोधने (क्र्या०प०)–

(३३) अपह्नवे ज्ञः ।४४।

प०वि०–अपह्नवे ७ ।१ ज्ञः ५ ।१ ।

अर्थः–अपह्नवे=अपलापेऽर्थे वर्तमानाद् ज्ञा-धातोः कर्तरि आत्मनेपदं भवति ।

उदा०–शतमपजानीते । सहस्रमपजानीते । शतं सहस्रं वाऽपलपतीत्यर्थः ।

आर्यभाषा–अर्थ–(अपह्नवे) मिथ्याभाषण अर्थ में विद्यमान (ज्ञः) ज्ञा धातु से (कर्तरि) कर्तृवाच्य में (आत्मनेपदम्) आत्मनेपद होता है।

उदा०–शतम् अपजानीते। सौ रुपये के लिये मिथ्याभाषण करता है। सहस्रम् अपजानीते। हजार रुपये के लिये झूठ बोलता है। अप उपसर्गपूर्वक ज्ञा धातु मिथ्याभाषण अर्थ में प्रयुक्त होती है।

सिद्धि–अपजानीते। अप+ज्ञा+लट्। अप+जा+श्ना+त। अप+ज्ञा+ना+त। अप+जा+नी+ते। अपजानीते।

यहां 'ज्ञा अवबोधने' (क्र्या०प०) धातु से 'लट्' प्रत्यय और उसके स्थान में आत्मनेपद 'त' आदेश और 'क्र्यादिभ्यः श्ना' (३ ।१ ।८१) से 'श्ना' प्रत्यय होता है। 'ज्ञाजनोर्जा' (७ ।३ ।७९) से 'ज्ञा' के स्थान में 'जा' आदेश और 'ई हल्यघोः' (६ ।४ ।११३) से 'श्ना' के 'आ' को 'ई' आदेश होता है।

(३४) अकर्मकाच्च ।४५।

प०वि०–अकर्मकात् ५ ।१ च अव्ययपदम् ।

स०–न विद्यते कर्म यस्य सः-अकर्मकः, तस्मात्-अकर्मकात् (बहुव्रीहिः) ।

अनु०–'ज्ञः' इत्यनुवर्तते ।

अन्वयः–अकर्मकाच्च ज्ञः कर्तरि आत्मनेपदम् ।

अर्थः–अकर्मकात्=अकर्मकक्रियावचनात् ज्ञा-धातोः कर्तरि आत्मनेपदं भवति ।

उदा०–सर्पिषो जानीते । मधुनो जानीते । **सर्पिषो मधुनो वा उपायेन भोजने प्रवर्तते इत्यर्थः । सर्पिः=घृतम् ।**

आर्यभाषा-अर्थ-(अकर्मकात्) अकर्मक क्रियावाची (ज्ञः) ज्ञा धातु से (कर्तरि) कर्तृवाच्य में (आत्मनेपदम्) आत्मनेपद होता है।

उदा०-सर्पिषो जानीते। मधुनो जानीते। घृत/मधु के कारण भोजन में प्रवृत्त होता है।

सिद्धि-जानीते। ज्ञा+लट्। ज्ञा+श्ना+तु। जानीते। पूर्ववत्।

*विशेष-प्रश्न-यहां ज्ञा धातु अकर्मक कैसे हैं? उत्तर-यहां सर्पि अथवा मधु ज्ञेय रूप में विवक्षित नहीं है किन्तु ज्ञानपूर्वक प्रवृत्ति करने में करणरूप में विवक्षित है। इसलिये **'सर्पिषो जानीते'** यहां **'ज्ञोऽविदर्थस्य करणे'** (२।३।५१) से षष्ठी विभक्ति होती है।*

(३५) सम्प्रतिभ्यामनाध्याने।४६।

प०वि०-सम्+प्रतिभ्याम् ५।१ अनाध्याने ७।१।

स०-सं च प्रतिश्च तौ सम्प्रती, ताभ्याम्-संप्रतिभ्याम् (इतरेतरयोगद्वन्द्वः)। उत्कण्ठापूर्वकं स्मरणम्-आध्यानम्, न आध्यानम् इति अनाध्यानम्, तस्मिन्-अनाध्याने (नञ्तत्पुरुषः)।

अनु०-'ज्ञः' इत्यनुवर्तते।

अन्वयः-अनाध्याने सम्प्रतिभ्यां ज्ञः कर्तरि आत्मनेपदम्।

अर्थः-अनाध्याने (उत्कण्ठापूर्वकेऽस्मरणे)ऽर्थे वर्तमानात् सम्प्रतिभ्याम् उपसर्गाभ्यां परस्माद् ज्ञा-धातोः कर्तरि आत्मनेपदं भवति।

उदा०-(सम्) शतं संजानीते। सहस्रं संजानीते। शतं सहस्रं वाऽवेक्षते इत्यर्थः। **(प्रति)** शतं प्रतिजानीते। सहस्रं प्रतिजानीते। शतं सहस्रं वा अङ्गीकरोतीत्यर्थः।

आर्यभाषा-अर्थ-(अनाध्याने) उत्कण्ठापूर्वक स्मरण न करने अर्थ में विद्यमान (सम्प्रतीभ्याम्) सम् और प्रति उपसर्ग से परे (ज्ञः) ज्ञा धातु से (कर्तरि) कर्तृवाच्य में (आत्मनेपदम्) आत्मनेपद आदेश होता है।

उदा०-(सम्) शतं संजानीते। सहस्रं संजानीते। सौ अथवा हजार को ठीक जानता है। (प्रति) शतं प्रतिजानीते। सहस्रं प्रतिजानीते। सो अथवा हजार प्रतिज्ञा करता है।

*विशेष-प्रश्न-यहां उत्कण्ठापूर्वक स्मरण अर्थ का किसलिये निषेध किया है? उत्तर-यहां आत्मनेपद न हो-**मातुः संजानाति बालः। पितुः संजानाति बालः।** बालक माता अथवा पिता को उत्कण्ठापूर्वक स्मरण करता है।*

वद व्यक्तायां वाचि (भ्वा०प०)-

(३६) भासनोपसंभाषाज्ञानयत्नविमत्युपमन्त्रणेषु वदः ।४७।

प०वि०-भासन-उपसंभाषा-ज्ञान-यत्न-विमति-उपमन्त्रणेषु ७।३ वदः ५।१।

स०-भासनं च उपसंभाषा च ज्ञानं च यत्नश्च विमतिश्च उपमन्त्रणं च तानि-भासनोपसंभाषाज्ञानयत्नविमत्युपमन्त्रणानि, तेषु-भासनोपसंभाषा-ज्ञानयत्नविमत्युपमन्त्रणेषु (इतरेतरयोगद्वन्द्वः)।

अन्वयः-भासन०उपमन्त्रणेषु वदः कर्तरि आत्मनेपदम्।

अर्थः-भासन-उपसंभाषा-ज्ञान-यत्न-विमति-उपमन्त्रणेष्वर्थेषु वर्तमानाद् वदो धातोः कर्तरि आत्मनेपदम् भवति।

उदा०-(भासने) व्याकरणशास्त्रे वदते। भासमानः= दीप्यमानस्तत्र-पदार्थान् व्यक्तीकरोतीत्यर्थः। **(उपसंभाषायाम्)** कर्मकरानुपवदते। उपसान्त्वयतीत्यर्थः। **उपसंभाषा**=उपसान्त्वनम्। **(ज्ञाने)** व्याकरणे वदते। जानाति वदितुमित्यर्थः। **ज्ञानम्**=सम्यगवबोधः। **(यत्ने)** क्षेत्रे वदते। तत्र उत्सहते इत्यर्थः। **यत्नः**=उत्साहः। **(विमतौ)** क्षेत्रे विवदन्ते। गेहे विवदन्ते। तत्र विमतिपतिता विचित्रं भाषन्ते इत्यर्थः। **विमतिः**=नानामतिः। **(उपमन्त्रणे)** कुलभार्यामुपवदते। परदारानुपवदते। उपच्छन्दयतीत्यर्थः। **उपमन्त्रणम्**=रहस्युपच्छन्दनम्।

__आर्यभाषा-अर्थ-__(भासन०) भासन, उपसंभाषा, ज्ञान, यत्न, विमति और उपमन्त्रण अर्थ में विद्यमान (वदः) वद् धातु से (कर्तरि) कर्तृवाच्य में (आत्मनेपदम्) आत्मनेपद होता है।

*उदा०-**(भासन)** व्याकरणशास्त्रे वदते। व्याकरणशास्त्र में दीप्यमान होकर उसके पदार्थों को प्रकाशित करता है। **(उपसंभाषा)** कर्मकरानुपवदते। नौकरों को सान्त्वना प्रदान करता है। **(ज्ञान)** व्याकरणशास्त्रे वदते। व्याकरणशास्त्र को बोलना जानता है। **(यत्न)** क्षेत्रे वदते। क्षेत्रविषयक उत्साह को प्रकट करता है। **(विमति)** क्षेत्रे विवदन्ते। खेत में नानामति में पड़े हुये विचित्र भाषण करते हैं। **(उपमन्त्रण)** कुलभार्यामुपवदते। कुलभार्या को बहकाता है। **परदारानुपवदते।** परदारा को फुसलाता है।*

__सिद्धि-वदते।__ वद्+लट्। वद्+शप्+त। वद्+अ+ते। वदते। यहां भासन आदि अर्थ में वद धातु से आत्मनेपद 'त' प्रत्यय है।

(३७) व्यक्तवाचां समुच्चारणे।४८।

प०वि०-व्यक्तवाचाम् ६।३ समुच्चारणे ७।१।

स०-व्यक्ता वाचो येषां ते व्यक्तवाचः, तेषाम्-व्यक्तवाचाम् (बहुव्रीहिः)।

अनु०-'वदः' इत्यनुवर्तते।

अन्वयः-व्यक्तवाचां समुच्चारणे वदः कर्तरि आत्मनेपदम्।

अर्थः-व्यक्तवाचाम्=मनुष्याणां समुच्चारणे=सहोच्चारणेऽर्थे वर्तमानाद् वद-धातोः कर्तरि आत्मनेपदम् भवति।

उदा०-सम्प्रवदन्ते ब्राह्मणाः। सम्प्रवदन्ते क्षत्रियाः। मिलित्वा वेदमन्त्रादिकमुच्चारयन्तीत्यर्थः।

आर्यभाषा-अर्थ-(व्यक्तवाचाम्) व्यक्तवाणीवाले मनुष्यों के (समुच्चारणे) साथ उच्चारण करने अर्थ में विद्यमान (वदः) वद् धातु से (कर्तरि) कर्तृवाच्य में (आत्मनेपदम्) आत्मनेपद होता है।

*उदा०-**सम्प्रवदन्ते ब्राह्मणाः।** ब्राह्मण मिलकर मन्त्रोच्चारण करते हैं। सम्प्रवदन्ते क्षत्रियाः। क्षत्रिय मिलकर मन्त्रोच्चारण करते हैं।*

*सिद्धि-**सम्प्रवदन्ते।** सम+प्र+वद्+लट्। सम्+प्र+वद्+शप्+झ। सम्+प्र+वद्+अ+अन्ते। सम्प्रवदन्ते। यहां सम्-प्र उपसर्गपूर्वक मनुष्यों के समुच्चारण अर्थ में वद् धातु से लट् प्रत्यय और उसके स्थान में आत्मनेपद में झ-आदेश होता है। 'झोऽन्तः' (७।१।३) से 'झ' के स्थान में अन्त आदेश होता है।*

(३८) अनोरकर्मकात्।४९।

प०वि०-अनोः ५।१ अकर्मकात् ५।१

स०-न विद्यते कर्म यस्य सः-अकर्मकः, तस्मात्-अकर्मकात् (बहुव्रीहिः)।

अनु०-'वदः, व्यक्तवाचाम्' इत्यनुवर्तते।

अन्वयः-व्यक्तवाचाम् अनोरकर्मकाद् वदः कर्तरि आत्मनेपदम्।

अर्थः-व्यक्तवाग्विषयाद् अकर्मकाद् वद-धातोः कर्तरि आत्मनेपदं भवति।

उदा०–अनुवदते कठः कलापस्य। अनुवदते मौद्गः पैप्पलादस्य। **अनुः** सादृश्येऽर्थे वर्तते। यथा कलापोऽधीयानो वदति तथा कठ इति। यथा च पैप्पलादोऽधीयानो वदति तथा मौद्ग इति।

__आर्यभाषा-अर्थ__-(व्यक्तवाचाम्) मनुष्यवाणी विषयक, (अनोः) अनु उपसर्ग से परे (अकर्मकात्) अकर्मक क्रियावाची (वदः) वद् धातु से परे (कर्तरि) कर्तृवाच्य में (आत्मनेपदम्) आत्मनेपद होता है।

उदा०–__अनुवदते कठः कलापस्य।__ जैसे अध्ययन करता हुआ कलाप बोलता है, वैसे ही कठ बोलता है। अनुवदते मौद्गः पैप्लादस्य। जैसे पढ़ता हुआ पैप्लाद बोलता है, वैसे ही मौद्ग बोलता है। यहां 'अनु' शब्द सदृश अर्थ का वाचक है।

अन्वयः-अस्त्रियां बहुषु गोत्रे यञञोश्च लुक्, तेनैव कृतं बहुत्वं चेत्।

अर्थः-स्त्रीलिङ्गवर्जितस्य बहुष्वर्थेषु वर्तमानस्य गोत्रापत्येऽर्थे विहितस्य यञ्प्रत्ययस्य अञ्प्रत्ययस्य **च लुग् भवति**, यदि तेनैव **गोत्रप्रत्ययेन** कृतं **बहुत्वं स्यात्**।

उदा०-(१) **यञ्**-गर्गस्य गोत्रापत्यं गार्ग्यः। गर्गस्य बहूनि अपत्यानि-गर्गाः। वत्सस्य गोत्रापत्यं वात्स्यः। वत्सस्य बहूनि अपत्यानि-वत्साः।

(२) **अञ्**-बिदस्य गोत्रापत्यं बैदः। बिदस्य बहूनि अपत्यानि-बिदाः। उर्वस्य गोत्रापत्यम्-और्वः। उर्वस्य बहूनि अपत्यानि-उर्वाः।

आर्यभाषा-अर्थ-(अस्त्रियाम्) स्त्रीलिङ्ग से रहित (बहुषु) बहुत अर्थों में वर्तमान (गोत्रे) गोत्रापत्य अर्थ में विहित (यञञोश्च) यञ् और अञ् प्रत्यय का (लुक्) लोप होता है यदि (तेन-एव) उसी गोत्र-प्रत्यय से बहुत्व का कथन किया हो।

*उदा०-(१) **यञ्-गर्गस्य गोत्रापत्यं गार्ग्यः।** गर्ग ऋषि का पौत्र 'गार्ग्य' कहाता है। **गर्गस्य बहूनि अपत्यानि-गर्गाः।** गर्ग ऋषि के बहुत पौत्र 'गर्गाः' कहाते हैं। **वत्सस्य गोत्रापत्य वात्स्यः।** वत्स ऋषि का पौत्र 'वात्स्य' कहाता है। **वत्सस्य बहूनि अपत्यानि-वत्साः।** वत्स ऋषि के बहुत पौत्र 'वत्साः' कहाते हैं।*

*(२) **अञ्-बिदस्य गोत्रापत्यं बैदः।** बिद ऋषि का पौत्र 'बैद' कहाता है। **बिदस्य बहूनि अपत्यानि-बिदाः।** बिद ऋषि के बहुत पौत्र 'बिदाः' कहाते हैं। **उर्वस्य गोत्रापत्यं और्वः।** उर्व ऋषि का पौत्र 'और्वः' कहाता है। **उर्वस्य बहूनि अपत्यानि-उर्वाः।** उर्व ऋषि के बहुत पौत्र 'उर्वाः' कहाते हैं।*

*सिद्धि-(१) **गर्गाः।** गर्ग+ङस्+यञ्+जस्। गर्ग+अस्। गर्गाः।*

*यहां गर्ग प्रातिपदिक से **'गर्गादिभ्यो यञ्'** (४।१।१०५) से गोत्रापत्य अर्थ में 'यञ्' प्रत्यय है। उसके बहुत पौत्रों के अर्थ की विवक्षा में इस यञ्प्रत्यय का इस सूत्र से लुक् हो जाता है।*

*(२) **बिदाः।** बिद+ङस्+अञ्+जस्। बिद+०+जस्। बिदाः।*

*यहां बिद प्रातिपदिक से **'अनृष्यानन्तर्ये बिदादिभ्योऽञ्'** (४।१।१०४) से गोत्रापत्य अर्थ में 'अञ्' प्रत्यय है। उसके बहुत पौत्रों की विवक्षा में इस 'अञ्' प्रत्यय का इस सूत्र से लुक् हो जाता है।*

गोत्रप्रत्ययस्य-

(८) अत्रिभृगुकुत्सवसिष्ठगोतमाङ्गिरोभ्यश्च।६५।

प०वि०-अत्रि-भृगु-कुत्स-वसिष्ठ-गोतम-अङ्गिरोभ्यः ५।३ च अव्ययपदम्।

स०-अत्रिश्च भृगुश्च कुत्सश्च वसिष्ठश्च गोतमश्च अङ्गिरा च ते-अत्रि०अङ्गिरसः, तेभ्यः-अत्रि०अङ्गिरोभ्यः (इतरेतरयोगद्वन्द्वः)।

अनु०-लुक्, बहुषु, तेन, एव, अस्त्रियाम्, गोत्रे इति चानुवर्तते।

अन्वयः-अस्त्रियां बहुषु अत्रिभृगुवत्सवसिष्ठगोतमाङ्गिरोभ्यश्च गोत्रे लुक् तेनैव कृतं बहुत्वं चेत्।

अर्थः-स्त्रीलिङ्गवर्जितेभ्यो बहुष्वर्थेषु वर्तमानेभ्यः अत्रिभृगुवत्सवसिष्ठ-गोतमाङ्गिरोभ्यश्च प्रातिपदिकेभ्यो गोत्रापत्येऽर्थे विहितस्य प्रत्ययस्य लुग् भवति, यदि तेनैव गोत्रप्रत्ययेन कृतं बहुत्वं स्यात्।

उदा०-(१) **अत्रिः**-अत्रेर्गोत्रापत्यम्-आत्रेयः। अत्रेर्बहूनि अपत्यानि-अत्रयः। (२) **भृगुः**-भृगोर्गोत्रापत्यम्-भार्गवः। भृगोर्बहूनि अपत्यानि-भृगवः। (३) **कुत्सः**-कुत्सस्य गोत्रापत्यम्-कौत्सः। कुत्सस्य बहूनि अपत्यानि-कुत्साः। (४) **वसिष्ठः**-वसिष्ठस्य गोत्रापत्यम्-वासिष्ठः। वसिष्ठस्य बहूनि अपत्यानि-वसिष्ठाः। (५) **गोतमः**-गोतमस्य गोत्रापत्यम्-गौतमः। गोतमस्य बहूनि अपत्यानि-गोतमाः। (६) **अङ्गिराः**-अङ्गिरसो गोत्रापत्यम्-आङ्गिरसः। अङ्गिरसो बहूनि अपत्यानि-अङ्गिरसः।

आर्यभाषा-अर्थ-(अस्त्रियाम्) स्त्रीलिङ्ग से रहित (बहुषु) बहुत अर्थों में वर्तमान (अत्रि०अङ्गिरोभ्यः) अत्रि, भृगु, कुत्स, वसिष्ठ, गोतम, अङ्गिरा इन प्रातिपदिकों से (च) भी (गोत्रे) गोत्रापत्य अर्थ में विहित प्रत्यय का (लुक्) लोप होता है, यदि (तेनैव) उसी गोत्रापत्य से बहुत्व का कथन किया गया हो।

*उदा०-(१) **अत्रि-अत्रेर्गोत्रापत्यम्-आत्रेयः।** अत्रि ऋषि का पौत्र 'आत्रेयः' कहाता है। **अत्रेर्बहूनि अपत्यानि-अत्रयः।** अत्रि ऋषि के बहुत पौत्र 'अत्रयः' कहाते हैं। (२) **भृगु-भृगोर्गोत्रापत्यम्-भार्गवः।** भृगु ऋषि का पौत्र 'भार्गवः' कहाता है। **भृगोर्बहूनि अपत्यानि-भृगवः।** भृगु ऋषि के बहुत पौत्र 'भृगवः' कहाते हैं। (३) **कुत्स-कुत्सस्य गोत्रापत्यम्-कौत्सः।** कुत्स ऋषि का पौत्र 'कौत्सः' कहाता है। **कुत्सस्य बहूनि अपत्यानि-कुत्साः।** कुत्स ऋषि के बहुत पौत्र 'कुत्साः' कहाते हैं। (४) **वसिष्ठ-वसिष्ठस्य गोत्रापत्यम्-वासिष्ठः।** वसिष्ठ ऋषि का पौत्र 'वासिष्ठः' कहाता है। **वसिष्ठस्य बहूनि अपत्यानि-वसिष्ठाः।** वसिष्ठ ऋषि के बहुत पौत्र 'वसिष्ठाः' कहाते हैं। (५) **गोतम-गोतमस्य गोत्रापत्यम्-गौतमः।** गोतम ऋषि का पौत्र 'गौतमः' कहाता है। **गोतमस्य बहूनि अपत्यानि-गोतमाः।** गोतम ऋषि के पौत्र 'गोतमाः' कहाते हैं। (६) **अङ्गिरा-अङ्गिरसो गोत्रापत्यम्-आङ्गिरसः।** अङ्गिरा ऋषि का पौत्र 'आङ्गिरस' कहाता है। **अङ्गिरसो बहूनि अपत्यानि-अङ्गिरसः।** अङ्गिरा ऋषि के बहुत पौत्र 'अङ्गिरसः' कहाते हैं।*

सिद्धि-(१) अत्रयः। अत्रि+ङस्+ढक्+जस्। अत्रि+0+अस्। अत्रयः।

यहां अत्रि प्रातिपदिक से 'इतश्चानिञः' (४।१।१२२) से गोत्रापत्य अर्थ में 'ढक्' प्रत्यय होता है। उसके बहुत पौत्रों की विवक्षा में इस सूत्र से 'ढक्' प्रत्यय का लुक् हो जाता है।

(२) भृगवः। भृगु+ङस्+अण्+जस्। भृगु+अस्। भृगवः।

यहां भृगु प्रातिपदिक से 'ऋष्यन्धकवृष्णिकुरुभ्यश्च' (४।१।११४) से गोत्रापत्य अर्थ में 'अण्' प्रत्यय होता है। उसके बहुत पौत्रों की विवक्षा में इस सूत्र से 'अण्' प्रत्यय का लुक् हो जाता है।

(३) ऐसे ही-कुत्साः, वसिष्ठाः, गोतमाः, अङ्गिरसः।

प्राच्यभरतगोत्रप्रत्ययस्य–

(६) बह्वच इञः प्राच्यभरतेषु।६६।

प०वि०–बहु-अचः ५।१ इञः ६।१ प्राच्य-भरतेषु ७।३।

स०–बहवोऽचो यस्मिन् सः-बह्वच्, तस्मात्-बह्वचः (बहुव्रीहिः)। प्राक्षु भवाः प्राच्याः। प्राच्याश्च भरताश्च ते प्राच्यभरताः (कर्मधारयः)।

अनु०–लुक्, बहुषु, तेन, एव, गोत्रे इति चानुवर्तते। अस्त्रियाम् इति च नानुवर्तते।

अन्वयः–बहुषु बह्वचः प्राच्यभरतेषु इञो लुक्, तेनैव कृतं बहुत्वं चेत्।

अर्थः–बहुष्वर्थेषु वर्तमानाद् बहु-अचः प्रातिपदिकात् प्राच्यगोत्रे भरतगोत्रे चार्थे विहितस्य इञ्-प्रत्ययस्य लुग् भवति, यदि तेनैव गोत्र-प्रत्ययेन कृतं बहुत्वं स्यात्।

उदा०–(१) **प्राच्यगोत्रम्**–पन्नागारस्य गोत्रापत्यम्-पान्नागारिः। पन्नागारस्य बहूनि अपत्यानि-पन्नागाराः। मन्थरैषणस्य गोत्रापत्यम्-मान्थरैषणिः। मन्थरैषणस्य बहूनि अपत्यानि-मन्थरैषणाः।

(२) **भरतगोत्रम्**–युधिष्ठिरस्य गोत्यापत्यम्-यौधिष्ठिरिः। युधिष्ठिरस्य बहूनि अपत्यानि-युधिष्ठिराः। अर्जुनस्य गोत्रापत्यम्-आर्जुनिः। अर्जुनस्य बहूनि अपत्यानि-अर्जुनाः।

आर्यभाषा-अर्थ-(बहुषु) बहुत अर्थों में वर्तमान (बहु-अचः) बहुत् अच्वाले प्रातिपदिक से (प्राच्य-भारतेषु) प्राच्यगोत्र और भरतगोत्र में विहित (इञः) इञ्-प्रत्यय का (लुक्) लोप हो जाता है यदि (तेनैव) उसी गोत्रप्रत्यय से उसका बहुत्व कथन किया गया हो।

उदा०-(१) प्राच्यगोत्र-पन्नागारस्य गोत्रापत्यम्-पान्नागारिः। पन्नागार का पौत्र 'पान्नागारिः' कहाता है। पन्नागारस्य बहूनि अपत्यानि-पन्नागाराः। पन्नागार के बहुत पौत्र 'पन्नागाराः' कहाते हैं। मन्थरैषणस्य गोत्रापत्यम्-मान्थरैषणिः। मन्थरैषण का पौत्र 'मान्थरैषणिः' कहाता है। मन्थरैषणस्य बहूनि अपत्यानि-मन्थरैषणाः। मन्थरैषण के बहुत पौत्र 'मन्थरैषणाः' कहाते हैं।

(२) भरतगोत्र-युधिष्ठिरस्य गोत्रापत्यम्-यौधिष्ठिरिः। युधिष्ठिर का पौत्र 'यौधिष्ठिरिः' कहाता है। युधिष्ठिरस्य बहूनि अपत्यानि-युधिष्ठिराः। युधिष्ठिर के बहुत पौत्र 'युधिष्ठिराः' कहाते हैं। अर्जुनस्य गोत्रापत्यम्-आर्जुनिः। अर्जुन का पौत्र 'आर्जुनिः' कहाता है। अर्जुनस्य बहूनि अपत्यानि-अर्जुनाः। अर्जुन के बहुत पौत्र 'अर्जुनाः' कहाते हैं।

सिद्धि-पन्नागाराः। पन्नागार+ङस्+इञ्+जस्। पान्नागार+०+अस्। पन्नागाराः।

यहां प्राच्य गोत्रवाची 'पन्नागार' प्रातिपदिक से गोत्रापत्य के अर्थ में 'अत इञ्' (४।१।९५) से 'इञ्' प्रत्यय होता है। उसका बहुत पौत्रों की विवक्षा में इस सूत्र से लुक् हो जाता है। ऐसे ही अन्य उदाहरणों में भी समझ लेवें।

विशेष-शरावती (साबरमती) के पूर्व का देश प्राच्य कहाता है। वर्तमान कुरुक्षेत्र का प्राचीन नाम भरत जनपद था।

लुक्प्रतिषेधः-

(१०) न गोपवनादिभ्यः।६७।

प०वि०-न अव्ययपदम्, गोपवन-आदिभ्यः ५।३।

स०-गोपवन आदिर्येषां ते-गोपवनादयः, तेभ्यः-गोपवनादिभ्यः (बहुव्रीहिः)।

अनु०-लुक्, बहुषु, तेन, एव, गोत्रे इति चानुवर्तते।

अन्वयः-बहुषु गोपवनादिभ्यो गोत्रे लुङ् न, तेनैव कृतं बहुत्वं चेत्।

अर्थः-बहुष्वर्थेषु वर्तमानेभ्यो गोपवनादिभ्यः प्रातिपदिकेभ्यो गोत्रापत्येऽर्थे विहितस्य प्रत्ययस्य लुङ् न भवति, यदि तेनैव गोत्रप्रत्ययेन कृतं बहुत्वं स्यात्।

उदा०-गोपवनस्य गोत्रापत्यम्-गौपवनः। गोपवनस्य **बहूनि अपत्यानि-**गौपवनाः। शिग्रोर्गोत्रापत्यम्-शैग्रवः। शिग्रोर्बहूनि **अपत्यानि-शैग्रवाः।**

गोपवन। शिग्रु। बिन्दु। भाजन। अश्वावतान। श्यामाक। श्यमाक। श्यापर्ण। हरित। किन्दास। वह्यस्क। अर्कलूष। वध्योष। विष्णुवृद्ध। प्रतिबोध। रथन्तर। रथीतर। गविष्ठिर। निषाद। मठर। मृद। पुनर्भू। पुत्र। दुहितृ। ननान्दृ। **परस्त्री परशुं च।** इति बिन्दाद्यन्तर्गतो गोपवनादिगणः (४।१।१०४)।

आर्यभाषा-अर्थ-(बहुषु) बहुत अर्थों में वर्तमान (गोपवनादिभ्यः) गोपवन आदि प्रातिपदिकों से (गोत्रे) गोत्रापत्य अर्थ में विहित प्रत्यय का (लुक्) लोप (न) नहीं होता है।

*उदा०-**गोपवनस्य गोत्रापत्यम्-गौपवनः।** गोपवन का पौत्र 'गौपवनः' कहाता है। **गोपवनस्य बहूनि अपत्यानि-गौपवनाः।** गोपवन ऋषि के बहुत पौत्र 'गौपवनाः' कहाते हैं। **शिग्रोर्गोत्रापत्यम्-शैग्रवः।** शिग्रु ऋषि का पौत्र 'शैग्रवः' कहाता है। **शिग्रोर्बहूनि अपत्यानि-शैग्रवाः।** शिग्रु ऋषि के बहुत पौत्र 'शैग्रवाः' कहाते हैं।*

*सिद्धि-**गौपवनाः।** गोपवन+ङस्+अञ्+जस्। गौपवन+अ+अस्। गौपवनाः।*

*यहां **'गौपवन'** प्रातिपदिक से गोत्रापत्य अर्थ में **'अनृष्यानन्तर्ये बिदादिभ्योऽञ्'** (४।१।१०४) से 'अञ्' प्रत्यय है। **'यञञोश्च'** (२।४।६४) से इस 'अञ्' प्रत्यय का लुक् प्राप्त था। इस सूत्र से प्रत्यय के लुक् का प्रतिषेध किया गया है।*

विशेष-गोपवन आदि शब्द बिदादिगण (४।१।१०४) के अन्तर्गत हैं।

गोत्रप्रत्ययस्य-

(११) तिककितवादिभ्यो द्वन्द्वे।६८।

प०वि०-तिक-कितवादिभ्यः ५।३ द्वन्द्वे ७।१।

स०-तिकश्च कितवश्च तौ कितकितवौ, आदिश्च आदिश्च तौ आदी, तिककितवौ आदी येषां ते तिककितवादयः, तेभ्यः-तिककितवादिभ्यः (इतरेतरयोगद्वन्द्वगर्भितबहुव्रीहिः)।

अनु०-लुक्, बहुषु, तेन, एव, गोत्रे इति चानुवर्तते।

अन्वयः-द्वन्द्वे बहुषु तिककितवादिभ्यो गोत्रे लुक्, तेनैव कृतं बहुत्वं चेत्।

अर्थः-द्वन्द्वे समासे बहुष्वर्थेषु वर्तमानेभ्यस्तिकादिभ्यः कितवादिभ्यश्च प्रातिपदिकेभ्यो गोत्रापत्येऽर्थे विहितस्य प्रत्ययस्य लुग् भवति, यदि तेनैव गोत्रप्रत्ययेन कृतं बहुत्वं स्यात्।

उदा०-तिकस्य गोत्रापत्यं तैकायनिः, कितवस्य गोत्रापत्यं कैतवायनिः । तैकायनयश्च, कैतवायनयश्च ते-तिककितवाः । वङ्खरस्य गोत्रापत्यं वाङ्खरिः । भण्डीरथस्य गोत्रापत्यं भाण्डीरथिः । वाङ्खरयश्च भाण्डीरथयश्च ते वङ्खरभण्डीरथाः ।

तिककितवाः । वङ्खरभण्डीरथाः । उपकलमकाः । पफनकनरकाः । बकनखगुश्वपदपरिणद्धाः । उब्जककुभाः । लङ्कशान्तमुखाः । उरसलङ्कटाः । भ्रष्टककपिष्ठलाः । कृष्णाजिनकृष्णसुन्दराः । अग्निवेशदासेरकाः । इति तिककितवादयः ।

आर्यभाषा-अर्थ-(द्वन्द्वे) द्वन्द्व समास में (बहुषु) बहुत अर्थों में वर्तमान (तिककितवादिभ्यः) तिक आदि और कितव आदि प्रातिपदिकों से (गोत्रे) गोत्रापत्य अर्थ में विहित प्रत्यय का (लुक्) लोप होता है, यदि (तेन-एव) उसी गोत्रापत्य प्रत्यय से बहुत अर्थ का कथन किया गया हो।

*उदा०-(१) **तिकस्य गोत्रापत्यं तैकायनिः।** तिक ऋषि का पौत्र 'तैकायनिः' कहाता है। **कितवस्य गोत्रापत्यं कैतवायनिः।** कितव ऋषि का पौत्र 'कैतवायनिः' कहाता है। **तैकायनयश्च कैतवायनयश्च ते तिककितवाः।** तिक ऋषि और कितव ऋषि के बहुत पौत्र 'तिककितवाः' कहाते हैं।*

*(२) **वङ्खरस्य गोत्रापत्यं वाङ्खरिः।** वङ्खर ऋषि का पौत्र 'वाङ्खरिः' कहाता है। **भण्डीरथस्य गोत्रापत्यं भाण्डीरथिः।** भण्डीरथ ऋषि का पौत्र 'भाण्डीरथिः' कहाता है। **वाङ्खरयश्च भाण्डीरथयश्च ते वङ्खरभण्डीरथाः।** वङ्खर ऋषि और भण्डीरथ के ऋषि के बहुत पौत्र 'वङ्खरभण्डीरथाः' कहाते हैं।*

*सिद्धि-(१) **तिककितवाः।** तिक+ङस्+फिञ्+सु। तैक+आयनि+सु। तैकायनिः। कितव+ङस्+फिञ्+सु। कैतव+आयन+सु। कैतवायनिः।*

*यहां तिक और कितव प्रातिपदिक से गोत्रापत्य अर्थ में **'तिकादिभ्यः फिञ्'** (४।१।१५४) से 'फिञ्' प्रत्यय है। इनके द्वन्द्व समास में बहुत पौत्रों की विवक्षा में इस प्रत्यय का इस सूत्र से लुक् हो जाता है।*

*(२) **वङ्खरभण्डीरथाः।** यहां वङ्खर और भण्डीरथ प्रातिपदिक से गोत्रापत्य अर्थ में **'अत इञ्'** (४।१।९५) से 'इञ्' प्रत्यय होता है। इनके द्वन्द्व समास में बहुत पौत्रों की विवक्षा में इस सूत्र से इस प्रत्यय का लुक् हो जाता है।*

वा गोत्रप्रत्ययस्य–

(१२) उपकादिभ्योऽन्यतरस्यामद्वन्द्वे।६६।

प०वि०–उपक-आदिभ्य: ५।३ अन्यतरस्याम् अव्ययपदम्, अद्वन्द्वे ७।१।

स०–उपक आदिर्येषां ते उपकादय:, तेभ्य:–उपकादिभ्य: (बहुव्रीहि:)। न द्वन्द्व इति अद्वन्द्व:, तस्मिन्–अद्वन्द्वे (नञ्तत्पुरुष:)।

अनु०–लुक्, बहुषु, तेन, एव, गोत्रे इति चानुवर्तते।

अन्वय:–अद्वन्द्वे बहुषु उपकादिभ्यो गोत्रेऽन्यतरस्यां लुक्, तेनैव कृतं बहुत्वं चेत्।

अर्थ:–अद्वन्द्वे च समासे बहुष्वर्थेषु वर्तमानेभ्य: उपकादिभ्य: प्रातिपदिकेभ्यो गोत्रापत्येऽर्थे विहितस्य प्रत्ययस्य विकल्पेन लुग् भवति, यदि तेनैव गोत्रप्रत्ययेन कृतं बहुत्वं स्यात्।

उदा०–उपकलमका:। भ्रष्टककपिष्ठला:। कृष्णाजिनसुन्दरा:। उपकादीनामेते त्रय: शब्दा: कृतद्वन्द्वास्तिककितवादिषु पठ्यन्ते। एतेषु पूर्वसूत्रेण गोत्रप्रत्ययस्य नित्यं लुग् भवति।

अद्वन्द्वे चानेन सूत्रेण विकल्पो विधीयते–उपका औपकायना वा। लमका लामकायना वा। भ्रष्टका भ्राष्टकयो वा। कपिष्ठला: कापिष्ठलयो वा। कृष्णाजिना: कार्ष्णाजिनयो वा। कृष्णसुन्दरा:। कार्ष्णसुन्दरयो वा। परिशिष्टानां च द्वन्द्वेऽद्वन्द्वे च गोत्रप्रत्ययस्य विकल्पेन लुग् भवति–

पण्डराक। अण्डारक। गडुक। सुपर्यक। सुपिष्ठ। मयूरकर्ण। खारीजङ्घ। शलाबल। पतञ्जल। कण्ठेरणि। कुषीतक। काशकृत्स्न। निदाघ। कलशीकण्ठ। दामकण्ठ। कृष्णपिङ्गल। कर्णक। पर्णक। जटिलक। बधिरक। जन्तुक। अनुलोम। अर्द्धपिङ्गलक। प्रतिलोम। प्रतान। अनभिहित।

आर्यभाषा-अर्थ-(अद्वन्द्वे) अद्वन्द्व समास में (बहुषु) बहुत अर्थों में वर्तमान (उपकादिभ्य:) उपक आदि प्रातिपदिकों से (गोत्रे) गोत्रापत्य अर्थ में विहित प्रत्यय का

(अन्यतरस्याम्) विकल्प से (लुक्) लोप होता है, यदि (तेन-एव) उसी गोत्र प्रत्यय से बहुत अर्थ का कथन किया गया हो।

*उदा०-**उपकलमकाः, भ्रष्टककपिष्ठलाः, कृष्णाजिनसुन्दराः।** उपकादिगण के ये तीन शब्द द्वन्द्व समास सहित 'तिककितव' आदि गण में पठित हैं। इनमें पूर्वसूत्र (२।४।६८) से गोत्रप्रत्यय का नित्य लुक् होता है।*

*अद्वन्द्व में इस सूत्र से गोत्र-प्रत्यय के लुक् का विकल्प-विधान किया है-**उपकाः। औपकायनाः।** उपक ऋषि के पौत्र। **लमकाः। लामकायनाः।** लमक ऋषि के पौत्र। इत्यादि।*

सिद्धि-(१) उपकाः। उपक+ङस्+फक्+जस्। उपक+०+अस्। उपकाः।

*यहां उपक शब्द से गोत्रापत्य अर्थ में **'नडादिभ्यः फक्'** (४।१।९९) से फक् प्रत्यय है। उपक के बहुत पौत्रों की विवक्षा में इस सूत्र से उस 'फक्' प्रत्यय का लुक् हो जाता है।*

*(२) **औपकायनाः।** उपक+ङस्+फिञ्+जस्। औपक+आयन+अस्। औपकायनाः।*

यहां विकल्प पक्ष में 'फक्' प्रत्यय का 'लुक्' नहीं हुआ है।

गोत्रप्रत्ययस्य–

(१३) आगस्त्यकौण्डिन्ययोरगस्तिकुण्डिनच्।७०।

प०वि०-आगस्त्य-कौण्डिन्ययोः ६।२ अगस्ति-कुण्डिनच् १।१।

स०-आगस्त्यश्च कौण्डिन्यश्च तौ आगस्त्यकौण्डिन्यौ, तयोः-आगस्त्यकौण्डिन्ययोः (इतरेतरयोगद्वन्द्वः)। अगस्तिश्च कुण्डिनच् च एतयोः समाहारोऽस्तिकुण्डिनच् (समाहारद्वन्द्वः)।

अनु०-लुक् तेन एव बहुषु गोत्रे इति चानुवर्तते।

अन्वयः-बहुषु आगस्त्यकौण्डिन्ययोर्गोत्रे लुक्, तयोश्चागस्तिकुण्डिनच तेनैव कृतं बहुत्वं स्यात्।

अर्थः-बहुष्वर्थेषु वर्तमानयोरागस्त्यकौण्डिन्ययोः शब्दयोर्गोत्रापत्येऽर्थे विहितस्य प्रत्ययस्य लुग् भवति, तयोश्च स्थाने यथासंख्यम् अगस्तिकुण्डिनचावादेशौ भवतः, यदि तेनैव गोत्रप्रत्ययेन कृतं बहुत्वं स्यात्।

उदा०-अगस्त्यस्य गोत्रापत्यम्-आगस्त्य:। अगस्त्यस्य बहूनि अपत्यानि-अगस्तय:। कुण्डिन्या गोत्रापत्यम्-कौण्डिन्य:। कुण्डिन्या बहूनि अपत्यानि-कुण्डिना:।

आर्यभाषा-अर्थ-(बहुषु) बहुत अर्थों में वर्तमान (आगस्त्यकौण्डिन्ययो:) आगस्त्य और कौण्डन्य के (गोत्रे) गोत्रापत्य अर्थ में विहित प्रत्यय का (लुक्) लोप होता है और उनके स्थान में यथासंख्य (अगस्तिकुण्डिनच्) अगस्ति और कुण्डिनच् आदेश होते हैं, यदि (तेन-एव) उसी गोत्रप्रत्यय से उनके बहुत्व का कथन किया गया हो।

*उदा०-**अगस्त्यस्य गोत्रापत्यम्-आगस्त्य:।** अगस्त्य ऋषि का पौत्र 'आगस्त्य:' कहाता है। **अगस्त्यस्य बहूनि अपत्यानि-अगस्तय:।** अगस्त्य ऋषि के बहुत पौत्र 'अगस्तय:' कहाते हैं। **कुण्डिन्या गोत्रापत्यं कौण्डिन्य:।** कुण्डिनी ऋषिका का पौत्र 'कौण्डिन्य:' कहाता है। **कुण्डिन्या: बहूनि अपत्यानि-कुण्डिना:।** कुण्डिनी ऋषिका के बहुत पौत्र 'कुण्डिना:' कहाते हैं।*

***सिद्धि-(१) अगस्तय:।** अगस्त्य+ङस्+अण्+जस्। अगस्ति+०+अस्। अगस्तय:।*

*यहां अगस्त्य प्रातिपदिक से **'ऋष्यन्धकवृष्णिकुरुभ्यश्च'** (४।१।११४) से गोत्रापत्य अर्थ में 'अण्' प्रत्यय होता है। 'अगस्त्य' के बहुत पौत्र अर्थ की विवक्षा में इस सूत्र से इस 'अण्' प्रत्यय का लुक् हो जाता है और 'अगस्त्य' शब्द के स्थान में 'अगस्ति' आदेश हो जाता है।*

***(२) कुण्डिना:।** कुण्डिनी+ङस्+यञ्+जस्। कुण्डिनच्+०+अस्। कुण्डिना:।*

*यहां कुण्डिनी प्रातिपदिक से गोत्रापत्य अर्थ में **'गर्गादिभ्यो यञ्'** (४।१।१०५) से यञ् प्रत्यय होता है। 'कुण्डिनी' के बहुत पौत्र अर्थ की विवक्षा में इस सूत्र से 'यञ्' प्रत्यय का लुक् हो जाता है और उसके स्थान में 'कुण्डिनच्' आदेश होता है।*

*(३) कुण्डिनी शब्द मध्योदात्त है। कुण्डिनच् शब्द में चकार का अनुबन्ध **'चितोऽन्तोदात्त:'** (६।१।१६२) अन्तोदात्त स्वर के लिये किया गया है।*

सुप्प्रत्ययस्य-

(१४) सुपो धातुप्रातिपदिकयो:।७१।

प०वि०-सुप: ६।१ धातु-प्रातिपदिकयो: ६।२।

स०-धातुश्च प्रातिपदिकं च ते-धातुप्रातिपदिके, तयो:-धातुप्रातिपदिकयो: (इतरेतरयोगद्वन्द्व:)।

अनु०-लुक् इत्यनुवर्तते।

अन्वयः-धातुप्रातिपदिकयोः सुपो लुक्।

अर्थः-धात्ववयवस्य प्रातिपदिकावयवस्य च सुप्-प्रत्ययस्य लुग् भवति।

उदा०-(१) **धातोः**-आत्मनः पुत्रमिच्छति-पुत्रीयति। आत्मनो घटमिच्छति-घटीयति। (२) **प्रातिपदिकस्य**-कष्टं श्रित इति कष्टश्रितः। राज्ञः पुरुष इति राजपुरुषः।

आर्यभाषा-अर्थ-(धातुप्रातिपदिकयोः) धातु के अवयव और प्रातिपदिक के अवयव (सुपः) सुप्-प्रत्यय का (लुक्) लोप हो जाता है।

*उदा०-(१) **धातु-आत्मनः पुत्रमिच्छति-पुत्रीयति।** अपने पुत्र को चाहता है। **आत्मनो घटमिच्छति-घटीयति।** अपने घट (घड़ा) को चाहता है। (२) **प्रातिपदिक-कष्टं श्रित इति कष्टश्रितः।** कष्ट को प्राप्त हुआ। **राज्ञः पुरुष इति राजपुरुषः।** राजा का पुरुषः।*

*सिद्धि-(१) **पुत्रीयति।** पुत्र+अम्+क्यच्। पुत्र+य। पुत्रीय+लट्। पुत्रीय+शप्+ति। पुत्रीय+अ+ति। पुत्रीयति।*

*यहां 'पुत्र' शब्द से इच्छा अर्थ में '**सुप आत्मनः क्यच्**' (३।१।८) से 'क्यच्' प्रत्यय है। इसकी '**सनाद्यन्ता धातवः**' (३।१।३२) से धातु संज्ञा है। इस सूत्र से धातु-अवयवसम्बन्धी 'अम्' प्रत्यय (सुप्) का लुक् हो जाता है।*

*(२) **कष्टश्रितः।** कष्ट+अम्+श्रित+सु। कष्टश्रित+सु। कष्टश्रितः।*

*यहां 'कष्ट' और 'श्रित' सुबन्त का '**द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः**' (२।१।२४) से द्वितीया तत्पुरुष समास होता है। इस सूत्र से 'कष्ट' और 'श्रित' प्रातिपदिक के अवयव 'अम्' और 'सु' (सुप्) प्रत्यय का लुक् हो जाता है। 'कष्टश्रित' इसकी '**कृत्तद्धितसमासाश्च**' (१।२।४६) से पुनः प्रातिपदिक संज्ञा होकर 'सु' आदि प्रत्ययों की उत्पत्ति होती है।*

(३) सुप्-सु आदि २१ प्रत्ययों को 'सुप्' कहते हैं।

शप्-प्रत्ययस्य-

(१५) अदिप्रभृतिभ्यः शपः।७२।

प०वि-अदि-प्रभृतिभ्यः ५।३ शपः ६।१।

स०-अदिः प्रभृतिर्येषां तेऽदिप्रभृतयः, तेभ्यः-अदिप्रभृतिभ्यः (बहुव्रीहिः)।

अनु०-लुक् इत्यनुवर्तते।

अन्वयः-अदिप्रभृतिभ्यः शपो लुक्।

अर्थः-अदिप्रभृतिभ्यो धातुभ्य उत्तरस्य शप्-प्रत्ययस्य लुग् भवति।

उदा०-अत्ति। हन्ति। द्वेष्टि।

__आर्यभाषा-अर्थ__-(अदिप्रभृतिभ्यः) धातुपाठ के अदादिगण में पठित धातुओं से परे (शपः) शप्-प्रत्यय का (लुक्) लोप हो जाता है।

__उदा०-अत्ति।__ वह खाता है। __हन्ति।__ वह मारता है। __द्वेष्टि।__ वह द्वेष करता है।

__सिद्धि-अत्ति।__ अद्+लट्। अद्+शप्+तिप्। अद्+०+ति। अत्ति।

यहां 'अद् __भक्षणे__' (अदा०प०) धातु से वर्तमानकाल में __'वर्तमाने लट्'__ (३।२।१२३) से लट् प्रत्यय है। __'कर्तरि शप्'__ (३।१।६८) से शप्-प्रत्यय होता है। इस सूत्र से अदादिगण की अद् धातु से 'शप्' प्रत्यय का लुक् हो जाता है।

__विशेष__-पाणिनीय धातुपाठ में अदादिगण की सब धातु देख लेवें।

शप्प्रत्ययस्य (बहुलम्)-

(१६) बहुलं छन्दसि।७३।

प०वि०-बहुलम् १।१ छन्दसि ७।१।

अनु०-शपः, लुक् इति चानुवर्तते।

अन्वयः-छन्दसि बहुलं शपो लुक्।

अर्थः-छन्दसि विषये शप्-प्रत्ययस्य बहुलं लुग् भवति।

उदा०-(१) **शपो लुङ् न-वृत्रं हनति।** (ऋ० ८।८९।३)। अहिः शयते। (२) **शपो लुक्-त्राध्वं नो देवाः।** (ऋ० २।२९।६)।

__आर्यभाषा-अर्थ__-(छन्दसि) वेदविषय में (शपः) शप्-प्रत्यय का (बहुलम्) बहुलता से (लुक्) लोप होता है।

उदा०-(१) शप् का लुक् नहीं-वृत्रं __हनति।__ वह वृत्र को मारता है। __अहिः शयते।__ अहि (सर्प) सोता है। (२) शप् का लुक्-__त्राध्वं नो देवाः।__ हे विद्वानो ! तुम हमारा पालन करो।

सिद्धि-(१) __हनति।__ हन्+लट्। हन्+शप्+तिप्। हन्+अ+ति। हनति।

यहां 'हन __हिंसागत्योः__' (अदा०प०) धातु से वर्तमानकाल में __'वर्तमाने लट्'__ (३।२।१२३) से 'लट्' प्रत्यय है। __'कर्तरि शप्'__ (३।२।६८) से 'शप्' प्रत्यय है। यह धातु अदादिगण की है। __'अदिप्रभृतिभ्यः शपः'__ (२।४।७२) से शप् का लुक् कहा गया है किन्तु इस सूत्र से उक्त वैदिक प्रयोग में 'शप्' का 'लुक्' नहीं होता है। ऐसे ही-__शीङ् स्वप्ने__' (अदा०आ०) से-__शयते।__

(२) त्राध्वम्। त्रै+लोट्। त्रै+शप्+ध्वम्। त्रा+०+ध्वम्। त्राध्वम्।

यहां विधि आदि अर्थों में 'त्रैङ् पालने' (भ्वा०आ०) धातु से 'लोट् च' (३।३।१६२) से 'लोट्' प्रत्यय है। यहां वैदिक प्रयोग में भ्वादि धातु से इस सूत्र से 'शप्' प्रत्यय का लुक् हो जाता है।

(३) छन्द में बहुलवचन से जहां 'शप्' प्रत्यय का 'लुक्' विधान किया गया है वहां लुक् नहीं होता है और जहां लुक् विधान नहीं किया है, वहां लुक् हो जाता है। यह उपरिलिखित उदाहरणों में स्पष्ट है।

यङ्प्रत्ययस्य–

(१७) यङोऽचि च।७४।

प०वि०–यङः ६।१ अचि ७।१ च अव्ययपदम्।

अनु०–लुक्, बहुलम् इति चानुवर्तते।

अन्वयः–यङश्च बहुलं लुगचि।

अर्थः–यङ्प्रत्ययस्य च बहुलं लुग् भवति, अचि प्रत्यये परतः।

उदा०–(१) **अचि**–लोलुवः। पोपुवः। सनीस्रंसः। दनीध्वंसः। (२) **बहुलग्रहणाद् अनच्यपि लुग् भवति**–शाकुनिको लालपीति। दुन्दुभिर्वावदीति।

आर्यभाषा-अर्थ-(यङः) यङ्-प्रत्यय का (च) भी (बहुलम्) बहुलता से (लुक्) लोप हो जाता है (अचि) अच्-प्रत्यय परे होने पर।

*उदा०-**लोलुवः**। बहुत काटनेवाला। **पोपुवः**। बहुत पवित्र करनेवाला। **सनीस्रंसः**। बहुत नष्ट करनेवाला। **दनीध्वंसः**। बहुत ध्वंस करनेवाला।*

*यहां बहुल का ग्रहण करने से अच्-प्रत्यय से अन्यत्र भी यङ्-प्रत्यय का लुक् हो जाता है-**शाकुनिको लालपीति**। पक्षियों का शिकारी बहुत शब्द करता है। **दुन्दुभिर्वावदीति**। ढोल बहुत बजता है।*

*सिद्धि-(१) **लोलुवः**। लूञ्+यङ्। लू+लू+य। लोलूय+अच्। लोलू०+अ। लोल् उवङ्+अ। लोलुव+सु। लोलुवः।*

यहां 'लुञ् छेदने' (क्र्या०उ०) धातु से क्रियासमभिहार अर्थ में 'धातोरेकाचो हलादेः क्रियासमभिहारे यङ्' (३।१।२२) से यङ् प्रत्यय है। 'सन्यङोः' (६।१।९) से धातु को द्वित्व होता है। यङन्त 'लोलुव' धातु से 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' (३।१।१३४) से 'अच्' प्रत्यय होता है। अच्-प्रत्यय के परे होने पर इस सूत्र से 'यङ्'

*का लुक् हो जाता है। 'सार्वधातुकार्धधातुकयोः' (७।३।८४) से प्राप्त गुण का **'न धातुलोपे आर्धधातुके'** (१।१।४) से निषेध होता है। 'अचि श्नुधातुभ्रुवां य्वोरियङुवङौ' (६।४।७७) से धातु को 'उवङ्' आदेश हो जाता है।*

*(२) 'पूञ् पवने' (क्र्या०उ०) से 'स्रंसुध्वंसु अधःपतने' (भ्वा०प०) से **सनीस्रंसः** और दनीध्वंसः शब्द सिद्ध होते हैं।*

*(३) **लालपीति।** लप्+यङ्। लप्+लप्+य। ल+लप्+य। लालप्य+लट्। लालप्य+शप्+तिप्। लालप्य+०+ति। लालप्+०+ईट्+ति। लालपीति।*

*यहां 'लप् व्यक्तायां वाचि' (भ्वा०प०) धातु से पूर्ववत् यङ्-प्रत्यय है। **'दीर्घोऽकितः'** (७।४।८३) से अभ्यास को दीर्घ और **'यङो वा'** (७।३।९४) से ईट् आगम होता है। यहां बहुलवचन से 'अच्' प्रत्यय से अन्यत्र भी इस सूत्र 'यङ्' का लुक् होगया है। यङ्लुक् विषय को 'चर्करीतं च' (अदादिगणवार्तिक) से अदादिगण में मानने से **'अदिप्रभृतिभ्यः शपः'** (२।४।७२) से 'शप्' प्रत्यय का भी लुक् हो जाता है।*

(४) 'वद व्यक्तायां वाचि' (भ्वा०प०) से वावदीति।

शपः श्लुः–

(१७) जुहोत्यादिभ्यः श्लुः।७५।

प०वि०–जुहोति-आदिभ्यः ५।३ श्लुः १।१।

स०–जुहोतिरादिर्येषां ते जुहोत्यादयः, तेभ्यः-जुहोत्यादिभ्यः (बहुव्रीहिः)।

अनु०–शप इत्यनुवर्तते।

अन्वयः–जुहोत्यादिभ्यः शपः श्लुः।

अर्थः–जुहोत्यादिभ्यो धातुभ्य उत्तरस्य शप्-प्रत्ययस्य श्लुर्भवति।

उदा०–जुहोति। बिभेति। नेनेक्ति।

आर्यभाषा-अर्थ-(जुहोत्यादिभ्यः) जुहोति आदि धातुओं से परे (शपः) शप्-प्रत्यय का (श्लुः) श्लु=लोप होता है।

*उदा०-**जुहोति।** वह देता है, खाता है, लेता है। **बिभेति।** वह डरता। **नेनेक्ति।** वह शुद्ध करता/पोषण करता है।*

*सिद्धि-(१) **जुहोति।** हु+लट्। हु+शप्+तिप्। हु+०+ति। हु+हु+ति। झु+हु+ति। जु+हो+ति। जुहोति।*

यहां 'हु दानादनयोः, आदाने चेत्यके' (जु०प०) धातु से वर्तमानकाल में 'वर्तमाने लट्' (३।२।१२३) से लट्-प्रत्यय है। 'कर्तरि शप्' (३।२।६८) से 'शप' प्रत्यय है। इस सूत्र से शप् का 'श्लु' (लोप) होता है। 'श्लौ' (६।१।२०) से धातु को द्वित्व, 'कुहोश्चुः' (७।४।६२) से अभ्यास के ह को झ और 'अभ्यासे चर्च' (८।४।५४) से झ को ज होता है।

(२) 'ञिभी भये' (जु०प०) से-बिभेति। 'णिजिर् शौचपोषणयोः' (जु०प०) से-नेनिक्ति।

(३) प्रत्यय के लोप की 'प्रत्ययस्य लुक्श्लुलुपः' (१।१।६२) से लुक्, श्लु और लुप् ये तीन संज्ञायें होती हैं।

(४) पाणिनीय धातुपाठ के जुहोपत्यादिगण में जुहोति (हु) आदि धातु देख लेवें।

शपः श्लुः (बहुलम्)–

(१८) बहुलं छन्दसि।७६।

प०वि०–बहुलम् १।१ छन्दसि ७।१।

अनु०–शपः श्लुरिति चानुवर्तते।

अन्वयः–छन्दसि बहुलं शपः श्लुः।

अर्थः–छन्दसि विषये बहुलं शप्-प्रत्ययस्य श्लुर्भवति।

उदा०–(१) **शपः श्लुः–** पूर्णां विवष्टि। जनिमाबिभक्ति। **न च शपः श्लुः**–दाति प्रियाणि। धाति देवम्।

आर्यभाषा–अर्थ–(छन्दसि) वेदविषय में (बहुलम्) बहुलता से (शपः) शप्-प्रत्यय का (श्लुः) श्लु=लोप होता है।

उदा०–शप् का श्लु–**पूर्णां विवष्टि।** पूर्णा को चाहता है। **जनिमाबिभक्ति।** माता-पिता की सेवा करता है। (२) शप् का श्लु **नहीं–दाति प्रियाणि।** प्रिय वस्तुयें देता है। **धाति देवम्।** देवता (विद्वान्) का धारण-पोषण करता है।

सिद्धि–(१) **विवष्टि।** वश्+लट्। वश्+शप्+तिप्। वश+०+ति। वश्+वश्+ति। वि+वस्+ति। वि+वष्+टि। विवष्टि।

यहां 'वश कान्तौ' (अदा०प०) धातु से वर्तमानकाल में 'वर्तमाने लट्' (३।२।१२३) से 'लट्' प्रत्यय है। 'कर्तरि शप्' (३।१।६८) से 'शप्' प्रत्यय है। यह अदादिगण की धातु है अतः 'अदिप्रभृतिभ्यः शपः' (२।४।७२) से 'शप्' का 'लुक्' होना चाहिये किन्तु छन्द में बहुलवचन से 'शप्' का 'श्लु' होता है। 'श्लौ' (६।१।१०) से धातु को द्वित्व, 'बहुलं

छन्दसि' (७।४।७८) से अभ्यास को इत्व, 'व्रश्चभ्रस्ज०' (८।२।३६) से 'श्' को षत्व और 'ष्टुना ष्टुः' (८।४।४१) से टवर्ग=त को ट होता है।

*(२) 'भज सेवायाम्' (भ्वा०प०) से-**बिभक्ति।** पूर्ववत् 'शप्' का 'श्लु' है।*

*(३) **दाति।** दा+लट्। दा+शप्+तिप्। दा+०+ति। दाति।*

यहां 'डुदाञ् दाने' (अदा०उ०) धातु से बहुल-वचन से 'शप्' का 'लुक्' होगया है। यह धातु जुहोत्यादिगण की है, 'जुहोत्यादिभ्यः श्लुः' (२।४।७५) से 'शप्' का 'श्लु' होना चाहिये था। यह सब छन्द में बहुलवचन की महिमा है।

*(४) 'डुधाञ् धारणपोषणयोः' (जु०उ०) से-**धाति।***

सिच्प्रत्ययस्य-

(१६) गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु।७७।

प०वि०-गाति-स्था-घु-पा-भूभ्यः ५।३ सिचः ६।१ परस्मै-पदेषु ७।३।

स०-गातिश्च स्थाश्च घुश्च पाश्च भूश्च ते गातिस्थाघुपाभुवः, तेभ्यः-गातिस्थाघुपाभूभ्यः (इतरेतरयोगद्वन्द्वः)।

अनु०-लुगित्यनुवर्तते, न श्लुः।

अन्वयः-गातिस्थाघुपाभूभ्यः सिचो लुक् परस्मैपदेषु।

अर्थः-गातिस्थाघुपाभूभ्यो धातुभ्य उत्तरस्य सिच्-प्रत्ययस्य लुग् भवति, परस्मैपदेषु प्रत्ययेषु परतः।

उदा०-(१) **गातिः**-अगात्। (२) **स्था**-अस्थात्। (३) **घुः**-(दा)-अदात्। (धा)-अधात्। (४) **पा**-अपात्। (५) **भूः**-अभूत्।

आर्यभाषा-अर्थ-(गातिस्थाघुपाभूभ्यः) गाति, स्था, घु, (दा, धा) पा और भू धातु से परे (सिचः) सिच् प्रत्यय का (लुक्) लोप होता है यदि (परस्मैपदेषु) परस्मैपद प्रत्यय परे हों।

*उदा०-(१) गाति-**अगात्।** वह गया। (२) स्था-**अस्थात्।** वह ठहरा। (३) घु-(दा)-**अदात्।** उसने दिया। (धा)-**अधात्।** उसने धारण-पोषण किया। (४) पा-**अपात्।** उसने पीया। (५) भू-**अभूत्।** वह था।*

*सिद्धि-(१) **अगात्।** इण्+लुङ्। इ+च्लि+ल्। गा+सिच्+तिप्। अ+गा+०त्। अगात्।*

यहां 'इण् गतौ' (अदा०प०) धातु से सामान्य भूतकाल में 'लुङ्' (३।२।११०) से लुङ्' प्रत्यय है। 'च्लि लुङि' (३।१।४३) से 'च्लि' प्रत्यय और उसके स्थान में 'च्लेः सिच्' (३।१।४४) से 'सिच्' आदेश है। 'इणो गा लुङि' (२।४।४५) से आर्धधातुक विषय में 'इण्' के स्थान में 'गा' आदेश होता है। इस सेत्र से 'गा' धातु से परे सिच्-प्रत्यय का लुक् होता है।

(२) अस्थात्। 'ष्ठा गतिनिवृत्तौ' (भ्वा०प०)।

(३) अदात्। 'डुदाञ् दाने' (जु०उ०)।

(४) अधात्। 'डुधाञ् धारणपोषणयोः' (जु०उ०)।

(५) अपात्। 'पा पाने' (भ्वा०प०)।

(६) अभूत्। 'भू सत्तायाम्' (भ्वा०प०)।

विशेष-घु- 'दाधा घ्वदाप्' (१।१।२०) से 'दा' रूप और 'धा' रूप धातुओं की 'घु' संज्ञा की गई है। उनका यहां ग्रहण किया जाता है।

वा सिच्-प्रत्ययस्य--

(२०) विभाषा घ्राधेट्शाच्छासः।७८।

प०वि०-विभाषा १।१ घ्रा-धेट्-शा-छा-सः ५।१।

स०-घ्राश्च धेट् च शाश्च छाश्च साश्च, एतेषां समाहारो घ्राधेट्शाच्छासाः, तस्मात्-घ्राधेट्शाच्छासः (समाहारद्वन्द्वः)।

अनु०-लुक् सिचः परस्मैपदेषु इत्यनुवर्तते।

अन्वयः-घ्राधेट्शाच्छासः सिचो विभाषा परस्मैपदेषु।

अर्थः-घ्राधेट्शाच्छासाभ्यो धातुभ्य उत्तरस्य सिच्-प्रत्ययस्य विकल्पेन लुग् भवति, परस्मैपदेषु प्रत्ययेषु परतः।

उदा०-(१) **घ्रा**-अघ्रात्, अघ्रासीत्। (२) **धेट्**-अधात्, अधासीत्। (३) **शा**-अशात्, अशासीत्। (४) **छा**-अच्छात्, अच्छासीत्। (५) **सा**-असात्, असासीत्।

आर्यभाषा-अर्थ-(घ्राधेट्शाच्छासः) घ्रा, धेट्, शा, छा और सा धातुओं से परे (सिचः) सिच्-प्रत्यय का (विभाषा) विकल्प से (लुक्) लोप होता है (परस्मैपदेषु) परस्मैपद प्रत्यय परे होने पर।

*उदा०-(१) **घ्रा-अघ्रात्, अघ्रासीत्।** उसने सूंघा। (२) **धेट्-अधात्, अधासीत्।** उसने पीया। (३) **शा-अशात्, अशासीत्।** उसने छीला। (४) **छा-अच्छात्, अच्छासीत्।** उसने काटा। (५) **सा-असात्, असासीत्।** उसने समाप्त किया।*

सिद्धि-(१) अघ्रात्। घ्रा+लुङ्। अट्+घ्रा+च्लि+ल्। अ+घ्रा+सिच्+तिप्। अ+घ्रा+०+त्। अघ्रात्।

यहां 'घ्रा गन्धोपादाने' (भ्वा०प०) धातु से सामान्य भूतकाल में 'लुङ्' (३।२।११०) से 'लुङ्' प्रत्यय है। 'च्लि लुङि' (३।२।४३) से च्लि-प्रत्यय और 'च्लेः सिच्' (३।२।४४) से 'च्लि' के स्थान में 'सिच्' आदेश है। इस सूत्र से 'सिच्' प्रत्यय का 'लुक्' होता है।

(२) अघ्रासीत्। घ्रा+लुङ्। अट्+च्लि+ल्। अ+घ्रा+सिच्+तिप्। अ+घ्रा+इट्+स्+ईट्+त। अ+घ्रास्+ई+त्। अघ्रासीत्।

यहां 'यमरमनमातां सक् च' (६।३।७३) से धातु को 'सक्' आगम होता है। 'आर्धधातुकस्येड्वलादेः' (७।३।३५) से सिच् को इट् आगम, 'अस्तिसिचोऽपृक्ते' (७।३।९६) से त्-प्रत्यय को 'ईट्' आगम और 'इट ईटि' (७।२।२८) से सिच् के स् का लोप होता है। यहां विकल्प पक्ष में इस सूत्र से 'सिच्' का 'लुक्' नहीं हुआ।

(२) अधात्, अधासीत्। 'धेट् पाने' (भ्वा०प०)।

(३) अशात्, अशासीत्। 'शो तनूकरणे' (दिवा०प०)।

(४) अच्छात्, अच्छासीत्। 'छो छेदने' (दिवा०प०)।

(५) असात्, असासीत्। 'षो अन्तकर्मणि' (दिवा०प०)।

त+थास्-

(२१) तनादिभ्यस्तथासोः।७६।

प०वि०-तन-आदिभ्यः ५।३ त-थासोः ७।२।

स०-तन आदिर्येषां ते तनादयः, तेभ्यः-तनादिभ्यः (बहुव्रीहिः)। तश्च थास् च तौ तथासौ, तयोः-तथासोः (इतरेतरयोगद्वन्द्वः)।

अनु०-लुक्, सिचः, विभाषा इति चानुवर्तते।

अन्वयः-तनादिभ्यो सिचो विभाषा लुक् तथासोः।

अर्थः-तनादिभ्यो धातुभ्य उत्तरस्य सिच्-प्रत्ययस्य विकल्पेन लुग् भवति, त-थासोः प्रत्यययोः परतः।

उदा०-(त)-अतत, अतनिष्ट। असात, असनिष्ट। **(थास्)**-अतथाः, अतनिष्ठाः। असाथाः। असनिष्ठाः।

आर्यभाषा-अर्थ-(तनादिभ्यः) तन आदि धातुओं से परे (सिचः) सिच्-प्रत्यय का (विभाषा) विकल्प (लुक्) लोप होता है (त-थासोः) त और थास् प्रत्यय परे होने पर।

उदा०-(त)-अतत, अतनिष्ट। उसने फैलाया। असात, असनिष्ट। उसने दान किया। (थास्)-अतथाः, अतनिष्ठाः। तूने फैलाया। असाथाः, असनिष्ठाः। तूने दान किया।

सिद्धि-(१) अतत। अन्+लुङ्। अट्+तन्+च्लि+त्। अ+तन्+सिच्+त। अ+त०+०+त। अतत।

यहां 'तनु विस्तारे' (तना०उ०) धातु से पूर्ववत् 'लुङ्' प्रत्यय, च्लि और सिच् आदेश है। इस सूत्र से त-प्रत्यय परे होने पर सिच् प्रत्यय का लोप होता है। 'अनुदात्तोपदेश०' (६।४।३७) से अनुनासिक (न्) का लोप होता है।

(२) अतनिष्ट। तन्+लुङ्। अट्+तन्+च्लि+त। अ+तन्+सिच्+त। अ+तन्+इट्+स्+त। अतनिष्ट।

यहां विकल्प पक्ष में इस सूत्र से 'सिच्' प्रत्यय का 'लुक्' नहीं होता है। 'आर्धधातुकस्येड्वलादेः' (७।२।३५) से 'सिच्' प्रत्यय को 'इट्' आगम, 'आदेश-प्रत्यययोः' (८।३।५९) से षत्व और 'ष्टुना ष्टुः' (८।४।४२) से ष्टुत्व होता है।

(३) थास्-प्रत्यय के रूप भी ऐसे ही सिद्ध करें।

(४) असनिष्ट। 'षणु दाने' (तना०उ०)।

लिट्-प्रत्ययस्य-

(२२) मन्त्रे घसह्वरणशवृदहाद्वृच्कृगमिजनिभ्यो लेः।८०।

प०वि०-मन्त्रे ७।१ घस-ह्वर-णश-वृ-ह-आद्-वृच-कृ-गमि-जनिभ्यः ५।३ लेः ६।१।

स०-घसश्च ह्वरश्च णशश्च वृश्च दहश्च आच्च वृज् च कृश्च गमिश्च जनिश्च ते घस०जनयः, तेभ्यः-घस०जनिभ्यः (इतरेतरयोगद्वन्द्वः)।

अनु०-लुक् इत्यनुवर्तते।

अन्वयः-मन्त्रे घस०जनिभ्यो लेर्लुक्।

अर्थः-मन्त्रे विषये घसह्वरणशवृदहाद्वृचकृगमिजनिभ्यो धातुभ्य उत्तरस्य च्लि-प्रत्ययस्य लुग् भवति।

उदा०-(१) घस-अक्षन्नमीमदन्त (ऋ० १।८२।२)। (२) **ह्वर-**माह्वर्मित्रस्य त्वम्। (३) **नश-**प्रणङ्मर्त्यस्य (ऋ० १।१८।३)। (४) **वृ (वृङ्, वृञ्)-**सुरुचो वेन आवः (यजु० १३।३)। (५) **दह-**मा न आधक् (ऋ० ६।६१।१४)। (६) **आत्-**(अकारान्त) आ प्रा द्यावापृथिवी

अन्तरिक्षम् (१।११५।१)। (७) वृज्- मा नो अस्मिन् महाधने परा वर्क् (ऋ० ८।७५।२)। (८) कृ-अक्रन् कर्म कर्मकृतः। (यजु० ३।४७)। (९) गमि-अग्मन् (ऋ० १।१२१।७)। (१०) जनि-अज्ञत वा अस्य दन्ताः (ऐ० ७।१४।१५)।

आर्यभाषा-अर्थ-(मन्त्रे) वेदविषय में (घस०जनिभ्यः) घस, हर, नश, वृ, दह, आत्=आकारान्त, वृज्, कृ, गमि और जनि धातुओं से परे (लेः) च्लि-प्रत्यय का (लुक्) लोप होता है।

उदा०-ऊपर संस्कृतभाषा में देख लेवें। उदाहरणों के अर्थ वेद में निर्दिष्ट पते पर देखें। मन्त्रखण्डों का अर्थ देना सम्भव नहीं है।

सिद्धि-(१) अक्षन्। अद्+लुङ्। घस्+ल्। अट्+घस्+च्लि+ल्। अ+घस्+०+झि। अ+घस्+अन्ति। अ+घस्+अन्त्। अ+घ्स्+अन्। अ+घ्ष्+अन्। अ+ग्ष्+अन्। अ+क्ष्+अन्। अक्षन्।

यहां 'अद भक्षणे' (अदा०प०) धातु से 'लुङ्' (३।२।११०) से सामान्य भूतकाल में 'लुङ्' प्रत्यय है। 'लुङ्सनोर्घस्लृ' (२।४।३७) से 'अद' के स्थान में 'घस्लृ' आदेश है। 'च्लि लुङि' (३।१।४३) से 'च्लि' प्रत्यय है। इस सूत्र से 'च्लि' प्रत्यय का लुक् होता है। 'झोऽन्तः' (७।२।३) से 'झ्' को अन्त-आदेश, 'इतश्च' (३।४।१००) से इकार का लोप, 'संयोगान्तस्य लोपः' (८।२।२३) से 'त्' का लोप होता है। 'गमहनजन०' (६।४।९२) से 'घस्' का उपधा लोप, 'शासिवसिघसीनां च' (८।३।६०) से 'घस्' को षत्व, (घष्) 'झलां जश् झशि' से घ्स् को जशत्व (ग्ष्) और 'खरि च' (८।४।५५) से ग्ष् को चर्त्व (क्ष्) होता है।

(२) माह्वः। ह्वृ+लुङ्। ह्वृ+च्लि+ल्। ह्वृ+०+तिप्। ह्वर्+त्। ह्वर्०। ह्वः।

यहां 'ह्वृ कौटिल्ये' (भ्वा०प०) धातु से पूर्ववत् 'लुङ्' और 'च्लि' प्रत्यय है। 'न माङ्योगे' (६।४।७४) से अड् आगम का निषेध है। इस सूत्र से 'च्लि' प्रत्यय का लुक् होता है। 'सार्वधातुकार्धधातुकयोः' (७।३।८४) से ह्वृ को गुण (ह्वर्) 'हल्ङ्याब्भ्यो दीर्घात्०' (६।१।६८) से 'त' का लोप होता है। 'खरवसानयोर्विसर्जनीयः' (८।३।२५) से 'र्' को विसर्जनीय होता है।

(३) प्राणट्। प्र+नश्+लुङ्। प्र+अट्+नश्+च्लि+ल्। प्र+अ+नश्+०+तिप्। प्रा+नश्+त्। प्रा+नष्+०। प्रा+नड्। प्रा+नट्। प्राणट्।

यहां 'णश अदर्शने' (दिवा०प०) धातु से पूर्ववत् 'लुङ्' और 'च्लि' प्रत्यय है। इस सूत्र से 'च्लि' प्रत्यय का लुक् होता है। 'व्रश्चभ्रस्ज०' (८।२।३६) से नश् को षत्व (नष्)। 'झलां जशोऽन्ते' (८।२।३९) से जशत्व (नट्) और 'वाऽवसाने' (८।४।५६)

से चर्त्व (नट्) होता है। 'उपसर्गादसमासेऽपि णोपदेशस्य' (८।४।१४) से णत्व होता है।

(४) आवः । आङ्+वृ+लुङ् । आ+अट्+वृ+च्लि+ल् । आ+वृ+०+तिप् । आ+वर्+त् । आ+वर्+० । आवः ।

यहां 'वृञ् वरणे' (स्वा०उ०) धातु से पूर्ववत् 'लुङ्' और 'च्लि' प्रत्यय है। इस सूत्र से 'च्लि' प्रत्यय का लुक् होता है। 'सार्वधातुकार्धधातुकयोः' (७।३।८४) से 'वृञ्' को गुण (वर्) और 'हल्ङ्याब्भ्यो दीर्घात्०' (६।१।६८) से 'त्' का लोप होता है।

(५) धक् । दह्+लुङ् । दह्+च्लि+ल् । दह्+०+सिप् । दह्+०+स् । दह्+० । दघ् । धघ् । धग् । धक् ।

यहां 'दह भस्मीकरणे' (भ्वा०प०) धातु से पूर्ववत् 'लुङ्' और 'च्लि' प्रत्यय है। इस सूत्र से 'च्लि' प्रत्यय का लुक् होता है। 'हल्ङ्याब्भ्यो दीर्घात्०' (६।१।६८) से 'स्' का लोप होता है। 'दादेर्धातोर्घः' (८।२।३२) से 'दह्' के 'ह्' को 'घ्', 'एकाचो बशो भष्०' (८।२।३७) से 'दह्' के 'द्' को 'ध्', 'झलां जशोऽन्ते' (८।२।३९) से 'घ्' को जस्='ग्' और 'वाऽवसाने' (८।४।५६) से 'ग्' को चर् 'क्' होता है। 'बहुलं छन्दस्यमाङ्योगेऽपि' (६।४।७५) से अट् आगम नहीं है।

(६) आप्राः । आङ्+प्रा+लुङ् । आ+अट्+प्रा+च्लि+ल् । आ+प्रा+०+सिप् । आ+प्रा+स् । आप्राः ।

यहां आङ्पूर्वक 'प्रा पूरणे' (अ०प०) धातु से पूर्ववत् 'लुङ्' और 'च्लि' प्रत्यय है। इस सूत्र से 'च्लि' प्रत्यय का लुक् होता है। 'ससजुषो रुः' (८।२।६६) से 'स्' को रुत्व और 'खरवसानयोर्विसर्जनीयः' (८।३।१५) से विसर्जनीय होता है।

(७) वर्क् । वृज्+लुङ् । वृज्+च्लि+ल् । वृज्+०+तिप् । वर्ज्+त् । वर्ज्+० । वर्ग् । वर्क् ।

यहां 'वृजी वर्जने' (अदा०आ०/रुधा०प०/चु०उ०) धातु से पूर्ववत् 'लुङ्' और 'च्लि' प्रत्यय है। इस सूत्र से 'च्लि' प्रत्यय का लुक् होता है। 'पुगन्तलघूपधस्य च' (७।३।८६) से 'वृज्' को गुण (वर्ज), 'हल्ङ्याब्भ्यो दीर्घात्०' (६।२।६८) से 'त्' का लोप, 'चोः कुः' (८।२।३०) से 'ज्' को कुत्व (ग्) और 'वाऽवसाने' (८।४।५६) से चर्त्व (क्) होता है। 'बहुलं छन्दस्यमाङ्योगेऽपि' (६।४।७५) से अट् आगम नहीं होता है।

(८) अक्रन् । कृ+लुङ् । अट्+कृ+च्लि+ल् । अ+कृ+०+झि । अ+कृ+अन्ति । अ+कृ+अन् । अक्रन् ।

यहां 'डुकृञ् करणे' (तना०उ०) धातु से पूर्ववत् 'लुङ्' और 'च्लि' प्रत्यय है। इस सूत्र से 'च्लि' प्रत्यय का लुक् होता है। 'झोऽन्तः' (७।१।३) से 'झ्' को अन्त आदेश और

*'**इतश्च**' (३।४।१००) से इकार का लोप होता है। '**इको यणचि**' (६।१।७७) से 'ऋ' को 'र्' होता है।*

*(९) **अग्मन्।** गम्+लुङ्। अट्+गम्+च्लि+ल्। अ+गम्+०+झि। अ+गम्+अन्ति। अ+गम्+अन्त्। अग्म्+अन्। अग्मन्।*

*यहां '**गम्लृ गतौ**' (भ्वा०प०) धातु से पूर्ववत् 'लुङ्' और 'च्लि' प्रत्यय है। इस सूत्र से 'च्लि' प्रत्यय का 'लुक्' होता है। '**गमहनजन०**' (६।४।९२) से गम् धातु का उपधा-लोप होता है। शेष कार्य पूर्ववत् है।*

*(१०) **अज्ञत।** जन्+लुङ्। अट्+जन्+च्लि+ल्। अ+जन्+झ। अ+जन्+अत। अ+ज्न्+अत। अ+ज्ञ्+अत। अज्ञत।*

*यहां '**जनी प्रादुर्भावे**' (दिवा०आ०) धातु से पूर्ववत् 'लुङ्' और 'च्लि' प्रत्यय है। इस सूत्र से 'च्लि' प्रत्यय का 'लुक्' होता है। '**आत्मनेपदेष्वनतः**' (७।१।५) से 'झ्' के स्थान में 'अत्' आदेश है। '**गमहनजन०**' (६।४।९८) से जन् का उपधा-लोप होता है। '**स्तोः श्चुना श्चुः**' (८।४।४०) से 'जन्' के 'न्' को चवर्ग (ञ्) होता है।*

आम्प्रत्ययस्य—

(२३) आमः।८१।

वि०–आमः ५।१।

अनु०–लुक्, लेरिति चानुवर्तते।

अन्वयः–आमो लेर्लुक्।

अर्थः–आम उत्तरस्य लिट्-प्रत्ययस्य लुग् भवति।

उदा०–ईहाञ्चक्रे। ऊहाञ्चक्रे।

***आर्यभाषा-अर्थ**-(आमः) आम् प्रत्यय से परे (लेः) लिट् प्रत्यय का (लुक्) लोप होता है।*

*उदा०-**ईहाञ्चक्रे।** उसने चेष्टा की। **ऊहाञ्चक्रे।** उसने वितर्क किया।*

*सिद्धि-(१) **ईहाञ्चक्रे।** ईह्+लिट्। ईह्+आम्+लि। ईह्+आम्+०। ईहाम्+सु। ईहाम्+०। ईहाम्। ईहाम्+कृ+लिट्। ईहाम्+क+कृ+ए। ईहां+च+कृ+ए। ईहाञ्चक्रे।*

*यहां '**ईह चेष्टायाम्**' (भ्वा०आ०) धातु से अनद्यतन परोक्ष भूतकाल में '**परोक्षे लिट्**' (३।२।११५) से लिट् प्रत्यय है। '**इजादेश्च गुरुमतोऽनृच्छः**' (१।३।३६) से आम्-प्रत्यय होता है। इस सूत्र से लिट् का लोप होता है। '**कृञ् चानुप्रयुज्यते लिटि**' (३।१।४०) से आम्-प्रत्यय के पश्चात् लिट् परे होने पर 'कृ' धातु का प्रयोग होता है।*

'आम्प्रत्ययवत् कृञोऽनुप्रयोगस्य' (१।३।६३) से अनुप्रयुक्त 'कृ' धातु से आत्मनेपद और 'लिटस्तझयोरेशिरेच्' (३।४।८२) से 'त' के स्थान में 'एश्' आदेश होता है। 'उरत्' (७।४।६६) से अभ्यास के 'ऋ' को 'अ' और 'कुहोश्चुः' (७।४।६२) से अभ्यास के 'क्' को 'च्' आदेश होता है।

(२) ऊहांचक्रे-ऊह वितर्के (भ्वा०आ०)। पूर्ववत्।

आपः सुपश्च–

(२४) अव्ययादाप्सुपः।८२।

प०वि०-अव्ययात् ५।१ आप्-सुपः ६।१।

स०-आप् च सुप् च एतयोः समाहार आप्सुप्, तस्य-आप्-सुपः (समाहारद्वन्द्वः)।

अनु०- लुग् इत्यनुवर्तते।

अन्वयः-अव्ययाद् आप्सुपो लुक्।

अर्थः-अव्ययाद् उत्तरस्य आपः सुपश्च प्रत्ययस्य लुग् भवति।

उदा०-(१) **आपः**-तत्र शालायाम्। यत्र शालायाम्। (२) **सुपः**-कृत्वा। हृत्वा।

आर्यभाषा-अर्थ-(अव्ययात्) अव्यय से परे (आप्-सुपः) आप् और सुप् प्रत्यय का (लुक्) लोप होता है।

*उदा०-(१) आप्-**तत्र शालायाम्**। उस शाला=घर में। **यत्र शालायाम्**। जिस शाला=घर में। (२) सुप्-**कृत्वा**। करके। **हृत्वा**। हरण करके।*

*सिद्धि-**तत्र**। तत्र+टाप्। तत्र+आप्। तत्र+०। तत्र+सु। तत्र।*

*यहां 'तत्र' शब्द की 'तद्धितश्चासर्वविभक्तिः' (१।१।३८) से अव्यय संज्ञा है। यहां तत्र शब्द का स्त्रीलिङ्ग शाला शब्द के साथ समानाधिकरण भाव होने से स्त्रीलिङ्ग की विवक्षा में 'अजाद्यतष्टाप्' (४।१।४) से 'टाप्' प्रत्यय होता है। इस सूत्र से 'टाप्' (आप्) प्रत्यय का लोप हो जाता है। ऐसे ही-**यत्र शालायाम्**।*

*(२) **कृत्वा**। कृ+क्त्वा। कृ+त्वा। कृत्वा+सु। कृत्वा+०। कृत्वा।*

यहां 'डुकृञ् करणे' (तना०उ०) धातु से 'समानकर्तृकयोः पूर्वकाले' (३।४।२१) से क्त्वा प्रत्यय है। 'क्त्वातोसुन्कसुनः' (१।२।४०) से क्त्वा-प्रत्ययान्त शब्द की अव्यय संज्ञा है। इस सूत्र से सुप् (सु) प्रत्यय का लुक् होता है।

सुब्लुक्प्रतिषेधः–

(२५) नाव्ययीभावादतोऽम्त्वपञ्चम्याः ।८३ ।

प०वि०–न अव्ययपदम्, अव्ययीभावात् ५ ।१ अतः ५ ।१ अम् १ ।१ तु अव्ययपदम्, अपञ्चम्याः ६ ।१ ।

स०–न पञ्चमी इति अपञ्चमी, तस्या अपञ्चम्याः (नञ्तत्पुरुषः) ।

अनु०–लुक् सुप् इति चानुवर्तते ।

अन्वयः–अतोऽव्ययीभावात् सुपो लुङ् न, सुपस्त्वम्, अपञ्चम्याः ।

अर्थः–अदन्ताद् अव्ययीभावाद् उत्तरस्य सुप्-प्रत्ययस्य लुङ् न भवति, सुपः स्थाने तु अम्-आदेशो भवति, विभक्तिं वर्जयित्वा ।

उदा०–कुम्भस्य समीपमिति उपकुम्भम् । उपकुम्भं तिष्ठति । उपकुम्भं पश्य ।

आर्यभाषा-अर्थ-(अतः) अकारान्त (अवययीभावः) अव्ययीभाव समास से परे (सुपः) सुप् प्रत्यय का (लुक्) लोप (न) नहीं होता है (तु) अपितु सुप् के स्थान में (अम्) अम्-आदेश होता है (अपञ्चम्याः) पञ्चमी विभक्ति को छोड़कर ।

*उदा०-**कुम्भस्य समीपमिति उपकुम्भम् ।** कुम्भ के पास । **उपकुम्भं तिष्ठति ।** वह कुम्भ के पास खड़ा है । **उपकुम्भं पश्य ।** तू कुम्भ के समीपस्थ को देख ।*

*सिद्धि-**उपकुम्भम् ।** उपकुम्भ+सु । उपकुम्भ+अम् । उपकुम्भम् ।*

यहां उप और कुम्भ सुबन्त का 'अव्ययं विभक्ति०' (२ ।१ ।६) से अव्ययीभाव समास है । अव्ययीभावश्च' (१ ।१ ।४२) से अव्ययीभाव समास की अव्यय संज्ञा है । पूर्व सूत्र से अव्ययीभाव से 'सुप्' प्रत्यय का लुक् प्राप्त था । इस सूत्र से सुप् प्रत्यय के लुक् का प्रतिषेध होता है और सुप् के स्थान में 'अम्' आदेश भी होता है ।

तृतीया+सप्तमी (बहुलम्)–

(२६) तृतीयासप्तम्योर्बहुलम् ।८४ ।

प०वि०–तृतीया-सप्तम्योः ६ ।२ बहुलम् १ ।१ ।

स०–तृतीया च सप्तमी च ते तृतीयासप्तम्यौ, तयोः-तृतीयासप्तम्योः (इतरेतरयोगद्वन्द्वः) ।

अनु०–अव्ययीभावात्, अतः, अम् इति चानुवर्तते ।

अन्वयः-अतोऽव्ययीभावात् तृतीयासप्तम्योर्बहुलम् अम्।

अर्थः-अदन्ताद् अव्ययीभावाद् उत्तरस्यास्तृतीयायाः सप्तम्याश्च विभक्तेः स्थाने बहुलम् अम्-आदेशो भवति।

उदा०-(१) **तृतीया**-उपकुम्भेन कृतम्। उपकुम्भं कृतम्। (२) **सप्तमी**-उपकुम्भे निधेहि। उपकुम्भं निधेहि।

आर्यभाषा-अर्थ-(अतः) अकारान्त (अव्ययीभावात्) अव्ययीभाव समास से परे (तृतीया-सप्तम्योः) तृतीया और सप्तमी विभक्ति के स्थान में (बहुलम्) विकल्प से (अम्) अम्-आदेश होता है।

उदा०-(१) तृतीया-कुम्भस्य समीपमिति उपकुम्भम्। उपकुम्भेन कृतेन। कुम्भ के समीपस्थ ने किया। उपकुम्भं कृतम्। अर्थ पूर्ववत् है। (२) सप्तमी-उपकुम्भे निधेहि। कुम्भ के समीप में रख। उपकुम्भं निधेहि। अर्थ पूर्ववत् है।

सिद्धि-(१) उपकुम्भेन। उपकुम्भ+टा। उपकुम्भ+इन। उपकुम्भेन।

यहां अव्ययीभाव उपकुम्भ शब्द से परे इस सूत्र से तृतीया विभक्ति का लोप नहीं होता है।

(२) उपकुम्भे। उपकुम्भ+ङि। उपकुम्भ+इ। उपकुम्भे।

यहां इस सूत्र से सप्तमी विभक्ति का लोप नहीं होता है।

(३) उपकुम्भम्। यहां विकल्प पक्ष में तृतीया और सप्तमी विभक्ति के 'टा' और 'ङि' प्रत्यय के स्थान में इस सूत्र से अम्-आदेश होता है।

डारौरसादेशाः-

लुटः प्रथमस्य डारौरसः।८५।

प०वि०-लुटः ६।१ प्रथमस्य ६।१ डा-रौ-रसः १।३।

स०-डाश्च रौश्च रस् च ते-डारौरसः (इतरेतरयोगद्वन्द्वः)।

अर्थः-लुटः प्रथमपुरुषस्यादेशानां स्थाने यथासंख्यं डा-रौ-रस आदेशा भवन्ति।

उदा०-तिप्-(डा)-कर्ता। **तस्-(रौ)**-कर्तारौ। **झि-(रस्)**-कर्तारः।

आर्यभाषा-अर्थ-(लुटः) लुट्लकार के (प्रथमस्य) प्रथम पुरुष के आदेशों के स्थान में यथासंख्य (डारौरसः) डा, रौ, रस् आदेश होते हैं।

*उदा०-तिप्-(डा)-**कर्ता**। वह करेगा। तस्-(रौ)-**कर्तारौ**। वे दोनों करेंगे। झि-(रस्) **कर्तारः**। वे सब करेंगे (श्वः=कल)।*

***सिद्धि**-(१) **कर्ता**। कृ+लुट्। कृ+तास्+ल्। कृ+तास्+तिप्। कृ+तास्+डा। कृ+त्+आ। कर्+त्+आ। कर्ता।*

*यहां 'डुकृञ् करणे' (तना०उ०) धातु से अनद्यतन भविष्यत्काल में '**अनद्यतने लुट्**' (३।३।१५) से 'लुट्' प्रत्यय है। '**स्यतासी लृलुटोः**' (३।१।३३) से तास् प्रत्यय है। इस सूत्र से प्रथम पुरुष के 'तिप्' प्रत्यय के स्थान में डा-आदेश होता है। 'डा' प्रत्यय के 'डित्' होने से '**डित्यभस्यापि टेर्लोपः**' (   ) से 'तास्' के टि-भाग का लोप होता है। '**सार्वधातुकार्धधातुकयोः**' (७।३।८४) से 'कृ' को गुण होता है।*

*(२) **कर्तारौ/कर्तारः**। यहां 'तस्' के स्थान में 'रौ' और 'झि' के स्थान में 'रस्' आदेश है। 'रि च' (७।४।५२) से 'तास्' के सकार का लोप होता है। शेष कार्य पूर्ववत् है।*

(३) कृञ् धातु उभयपद है। आत्मनेपद के त, आताम्, झ के स्थान में भी यथासंख्य डा, रौ, रस् आदेश होते हैं। आत्मनेपद में भी उपरिलिखित ही रूप बनते हैं।

इति श्रीयुतपरिव्राजकाचार्याणाम् ओमानन्दसरस्वतीस्वामिनां महाविदुषां पण्डितविश्वप्रियशास्त्रिणां शिष्येण पण्डितसुदर्शनदेवाचार्येण विरचिते पाणिनीयाष्टाध्यायीप्रवचने द्वितीयाध्यायस्य चतुर्थः पादः समाप्तः। समाप्तश्चायं द्वितीयोऽध्यायः। इति प्रथमो भागः।

पाणिनीय-अष्टाध्यायी-प्रवचनम्

प्रथमभागस्य सूत्रवर्णानुक्रमणिका

इति प्रथमभागस्य सूत्रवर्णानुक्रमणिका समाप्ता।

संक्षिप्तपदानां विवरणपत्रम्

१.	अ०	अदादिगण: ।
२.	अथर्व०	अथर्ववेद: ।
३.	अनु०	अनुवृत्ति: ।
४.	आ०	आत्मनेपदम् ।
५.	उ०	अभयपदम् ।
६.	उदा०	उदाहरणम् ।
७.	ऋ०	ऋग्वेद: ।
८.	क०	कण्ड्वादिगण: ।
९.	क्र्या०	क्र्यादिगण: ।
१०.	चु०	चुरादिगण: ।
११.	जु०	जुहोत्यादिगण: ।
१२.	त०	तनादिगण: ।
१३.	तु०	तुदादिगण: ।
१४.	दि०	दिवादिगण: ।
१५.	प०	परस्मैपदम् ।
१६.	प०वि०	पदच्छेदो विभक्तिश्च ।
१७.	प्र०सू०	प्रत्याहारसूत्रम् ।
१८.	पा०का०भा०	पाणिनि कालीन भारतवर्ष
१९.	फिट्०	फिट्सूत्रम् ।
२०.	भ्वा०	भ्वादिगण: ।
२१.	व्या०शा०प्रा०	व्याकरणशास्त्रप्रारम्भ: ।
२२.	य०	यजुर्वेद: ।
२३.	लि० अ०	लिङ्गानुशासनम् ।
२४.	स०	समास: ।
२५.	स्वा०	स्वादिगण: ।
२६.	सा०	सामवेद: ।
२७.	१ । १	प्रथमा-एकवचनम् ।
२८.	१ । २	प्रथमा-द्विवचनम् ।
२९.	१ । ३	प्रथमा-बहुवचनम् ।
		(एवं सर्वं विभक्तिवचनं स्वयमूह्यम्) ।
३०.	१।१।१	प्रथमाध्यायस्य प्रथमपादस्य प्रथमसूत्रम् । (एवं सर्वमूह्यम्) ।

।। इति संक्षिप्तपदानां विवरणपत्रम् ।।